# अवबोधस्य माध्यमः

२००८-२०१० राष्ट्रियपरिसंवादे आधारितम्



वयमपि विद्यालये स्याम



स्वस्यां भाषायां शृणुयाम
अवगच्छेम
कथयेम
नवद्रुमान् समारोपयेम

# अवबोधस्य माध्यमः

**2008 -2010 राष्ट्रियपरिसंवादे आधारितम्**


विद्यया ऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्

NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

**32156 — Samajh ka Madhyam**
**Rashytriya Parisamvad 2008–2010 per Aadharit (Sanksrit Language)**

**ISBN 978-93-5292-884-2**

**First Edition**

*August 2024 Shravana 1946*

**PD 1T BS**

© ***National Council of Educational Research and Training, 2024***

**ALL RIGHTS RESERVED**

- No part of this publication may be reproduced, stored in a retrieval system or transmitted, in any form or by any means, electronic, mechanical, photocopying, recording or otherwise without the prior permission of the publisher.
- This book is sold subject to the condition that it shall not, by way of trade, be lent, re-sold, hired out or otherwise disposed of without the publisher's consent, in any form of binding or cover other than that in which it is published.
- The correct price of this publication is the price printed on this page, Any revised price indicated by a rubber stamp or by a sticker or by any other means is incorrect and should be unacceptable.

**OFFICES OF THE PUBLICATION DIVISION, NCERT**

NCERT Campus
Sri Aurobindo Marg
**New Delhi 110 016** **Phone : 011-26562708**

108, 100 Feet Road
Hosdakere Halli Extension
Banashankari III Stage
**Bengaluru 560 085** **Phone : 080-26725740**

Navjivan Trust Building
P.O.Navjivan
**Ahmedabad 380 014** **Phone : 079-27541446**

CWC Campus
Opp. Dhankal Bus Stop
Panihati
**Kolkata 700 114** **Phone : 033-25530454**

CWC Complex
Maligaon
**Guwahati 781 021** **Phone : 0361-2674869**

**₹ 65.00**

*Printed on 80 GSM paper with NCERT watermark*

Published at the Publication Division by the Secretary, National Council of Educational Research and Training, Sri Aurobindo Marg, New Delhi 110 016 and printed at Taj Printers, 69/6A, Najafgarh Road Industrial Area, Near Kirti Nagar Metro Station, New Delhi 110 015

**Publication Team**

Head, Publication Division : *Anup Kumar Rajput*

Chief Production Officer : *Arun Chitkara*

Chief Editor : *Bijnan Sutar*

Chief Business Manager : *Amitabh Kumar*

Assistant Production Officer : *Deepak Kumar*

*परिवर्द्धित-संस्करणम्*

# आमुखम्

बालकानां प्रारम्भिकी शिक्षा मूलतः भाषाशिक्षा भवति। अत एव राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यनया एकदा पुनः मातृभाषामाध्यमेन शिक्षणाय विशेषाग्रहः प्रस्तावितः (अनुमोदितः)। पूर्ववर्तिषु शिक्षासम्बद्ध-परामर्शेष्वपि मातृभाषामाध्यमेन शिक्षणाय चिन्तनं चर्चा च भवति स्म। भारतदेशः एको बहुभाषी देशोऽस्ति। एतदर्थं सर्वेभ्यः बालेभ्यः शिक्षणं सहजं स्वाभाविकं निर्बाधगत्या च कर्तुं शिक्षणं भारतीयभाषामाध्यमेन कर्तुं महती आवश्यकता अनुभूयते। मातृभाषामाध्यमेन शिक्षणं भाषेतरविषयाणाम् आधारं दृढीकर्तुं सहायको भवति। राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यत्र स्पष्टरूपेण उल्लेखो विद्यते यत् पञ्चमीकक्षायावत् शिक्षणम् अनिवार्यतया मातृभाषामाध्यमेन एव भवतु। एषा प्रक्रिया अष्टमीकक्षायावत् अथवा ततोऽपि अग्रे अनुसृता स्यात् अस्य प्रयासः जायमानः अस्ति। बहुभाषिकतां वर्धयितुं विज्ञानस्य अन्येषां विषयाणां च मातृभाषामाध्यमेन उत्कृष्टाः पाठ्यसामग्र्यः उपलब्धाः कारणीयाः। अनेन छात्राणां मातृभाषा विद्यालयीयभाषा इत्यनयोः मध्ये सामीप्यं भविष्यति अपि च भाषासु परस्परं सामञ्जस्यं सेतुरूपेण प्रवृद्धं भविष्यति। अस्याधारः मातृभाषाः भविष्यन्ति।

अस्यां महत्यां योजनायां देशस्य विभिन्नविशेषज्ञानां भाषाशिक्षाविभागस्य च भूमिका अत्यन्तं महत्त्वपूर्णा अस्ति अत एव तेभ्यः साधुवादाः। आशासे यदिदं पुस्तकं बालशिक्षाम् आधृत्य कार्यकतॄणां विभिन्नराज्यानां योजनाकर्तॄणां विदुषां कृते आधारपुस्तिकारूपेण सहायकं भविष्यति।

**दिनेशप्रसादसकलानी**
निदेशकः
राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्

नवदेहली
मार्च २०२३

*प्रथम-संस्करणम्*
2010

# आमुखम्

बालानां जीवने शिक्षायां च भाषायाः भूमिका औपनिवेशिकसमाजेषु नैकाभिः विसंगतिभिः परितः आवृतमासीत्। एतासां विसंगतीनां निवारणार्थं प्रयत्नाः अपि प्रायः सामाजिकमान्यताभिः राजनैतिकविवादैश्च आव्रियन्ते। शिक्षासम्बन्धिता भाषानीतिः चिरकालात् चर्चायाः अनुसन्धानाच्च उभयोः क्षेत्रयोः बहिः आसीत् इत्यत्र नास्ति आश्चर्यम्। एषा परिस्थितिः परिवर्तिता स्यादिति उद्देश्यं कृत्वा राष्ट्रियपरिषद् 'अवबोधस्य माध्यमः' इति शीर्षकेण संगोष्ठीनां शृङ्खलायाः आयोजनम् अकरोत्। उदयपुर-पटना-वाराणसी-दिल्लीनगरेषु आयोजितानाम् एतासां संगोष्ठीनां केन्द्रं विद्यालयस्य दैनन्दिनजीवने बालानां भाषिकानुभवानां विषये विवेचना आसीत्। प्रयासः आसीत् यत् भाषायाः प्रयोगे शिक्षानीतिविषये दीर्घकालात् अवरूद्धाः विचारविमर्शाः नूतनतया पुनः आरब्धाः भवन्तु। एतत् पुस्तकम् एनं प्रयासम् अग्रे नेतुम् इत्यभिप्रायेन प्रकाश्यते।

पुस्तकस्य विषयवस्तूनि चतसृषु संगोष्ठीषु समुत्थापितानां प्रश्नानां, तेषां उत्तराणि अन्वेष्टुं प्रयुक्तानां तर्कानाञ्च साहाय्येन रचितानि सन्ति। आशास्महे यत् अनेन पुस्तकमाध्यमेन बालशिक्षासम्बद्धाः नागरिकाः, तेषां शिक्षकाः, तेषां प्रशिक्षकाः, अधिकारिणः, जनप्रतिनिधयः, सामाजिकसंस्थानां कार्यकर्तारः, अभिभावकाश्च सम्मिलिताः सन्ति- सर्वेऽपि शिक्षणे भाषायाः प्रश्नविषये चिन्तयितुं संवादं कर्तुञ्च प्रोत्साहनम् अनुभविष्यन्ति। एतादृशः संवादः अद्यतनीया ऐतिहासिकी आवश्यकतास्ति। शिक्षाधिकाराधिनियमेन बालानां मातृभाषायाः महत्त्वं पुनः स्थापयितुं अद्यतन-प्रयासाः कृताः सन्ति। अस्मिन् प्रयासे शिक्षायाः औपनिवेशिकेतिहासस्य उत्तराधिकारेण निर्मितं मानसिकं सामाजिकञ्च बन्धनं दूरीकर्तुं शक्तिः विद्यते। स्पष्टतया ज्ञायते यत् कस्मिन्नपि नियमे निहितां शक्तिम् अभिव्यञ्जनाय सामाजिक-संस्थागतसाहाय्यस्य आवश्यकता भवति। आङ्ग्लमाध्यमेन प्रचलिताः विद्यालयाः न केवलं समकालीनं यथार्थम्, अपितु एषा जटिला सांस्कृतिकसंरचना अपि अस्ति। एनां संवादपरकचेतनाक्षेत्रे आनयित्वा एव परिवर्तनस्य अपेक्षा कर्तुं शक्यते।

राष्ट्रियपाठ्यचर्यायाः रूपरेखायाम् २००५ इत्यत्र परिवर्तनस्य दिशायाः स्वरूपस्य च विषये पर्याप्तसंकेताः दत्ताः आसन्। भारतीयभाषाणाम् आङ्ग्लभाषायाश्च अध्ययनविषये

राष्ट्रियकेन्द्रितसमूहानां प्रतिवेदनेषु एतेषां संकेतानां विवरणं कृतमस्ति। एतौ प्रलेखौ कक्षायां शिक्षणमाध्यमं बालानाम् अवबोधस्य स्वाभाविकविकासक्रमं मनोभाषावैज्ञानिकसन्दर्भे स्थापयतः।

अस्य सन्दर्भस्य एकः महत्त्वपूर्णः आयामः भारतस्य बहुभाषिकं वातावरणमस्ति। अस्माकं बालाः जन्मतः एव बहुभाषिकवातावरणे निवसन्ति, अस्मिन् वातावरणे निहितं लोकसृजनं स्वस्य प्राकृतिकबौद्धिकविकासे गृह्णन्ति। वयं शिक्षाव्यवस्थायां भाषायाः अध्ययनं माध्यमभाषायाश्च प्रश्नविषये प्रचलितां जडताम् अस्मिन् बृहत्तरे परिप्रेक्ष्ये स्थापयित्वा अवगच्छामः इत्यस्य आवश्यकता वर्तते।

मम विश्वासो वर्तते यदेतत् पुस्तकं भाषासम्बन्धिनीतीः कार्यक्रमांश्च नूतनसमीक्षायाः कृते आधारपत्रस्य भूमिकां निर्वहिष्यति। परिषदः पक्षतः अहं सर्वेषां प्रतिभागिनां प्रति आभारं प्रकटयामि ये ‘अवबोधस्य माध्यमः’ इति संगोष्ठीमालायां भागं गृहीतवन्तः। गोष्ठीनां विमर्शान् संगृह्य अथकपरिश्रमेण पुस्तकस्य रूपं दत्तवत्योः भाषाशिक्षाविभागस्य डॉ. संध्यासिंहस्य डॉ. कीर्तिकपूरस्य चोभयोः कृते अहम् आभारं प्रकटयामि। अहं भाषाशिक्षाविभागस्य अध्यक्षस्य आचार्य-रामजन्मशर्मणः आधमर्ण्यं विभर्मि। यः संगोष्ठीशृङ्खलायाः कार्यक्रमान् उत्साहपूर्वकं संपादितवान्। आशासे यत् अस्य पुस्तकस्य प्रचार-प्रसाराभ्यां राज्यस्तरीयसंस्थाः भाषासम्बद्धप्रश्नानां विषये गहनतया चिन्तयितुं प्रेरणां प्राप्नुयुः।

**कृष्णकुमारः**

नवदेहली
निदेशकः

४ मार्च २०१०
राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्

# प्राक्कथनम्

भाषा अस्माकं मानवजीवने संस्कृतौ च अनिवार्यं महत्त्वपूर्णम् अपरिहार्यं च स्थानं धारयति। भाषया एव संस्कृत्याः स्वरूपम् आकारं वा सुनिश्चितं भवति। इयमस्माकम् अस्मिता अभिधानञ्च वर्तते। मातृभाषया शिक्षणं सामाजिकेषु सञ्ज्ञानात्मकेषु च सन्दर्भेषु बालान् समृद्धान् करोति।

'समझ का माध्यम' इति नामकं पुस्तकं २००८-२०१० इति अवधौ देशव्यापिन्याः चर्चायाः आधारेण मूलतः हिन्दीभाषया निर्मितम् आसीत् । साम्प्रतं राष्ट्रियशिक्षानीतिः २०२० इत्यस्य अनुशंसाः समावृत्य वर्तमानकाले इदम् आवश्यकं वर्तते यत् इदं पुस्तकं सम्पूर्णस्य देशस्य शैक्षणिकसंस्थाभ्यः तद्भाषायां सुलभं स्यात्, अत एव मूलतः हिन्दीभाषायां निर्मितस्य अस्य पुस्तकस्य आङ्ग्लभाषा-सहितं २३ भाषासु अनुवादं कृत्वा उपलब्धं कारयितुं प्रयासः क्रियमाणः वर्तते। प्रयत्नोऽयं अग्रे सर्वत्र वर्द्धितः प्रसृतः च स्यादिति धिया पुस्तकमिदं प्रकाश्यते। पुस्तकस्यास्य विषयवस्तु चतसृषु सङ्गोष्ठीषु उपस्थापितानां प्रश्नानां तदुत्तराणां च गवेशणाय प्रयुक्तानां तर्काणाञ्च आधारेण विनिर्मितं विद्यते।

विश्वासो मे वर्तते यदिदं पुस्तकं भाषासम्बद्धानां नीतीनां कार्यक्रमाणां च पुनः नवीनतया अवलोकनाय परीक्षणाय च एकां महत्त्वपूर्णामाधारभूताञ्च भूमिकां निर्वक्ष्यति। 'समझ का माध्यम' इति सङ्गोष्ठीशृङ्खलायां भागं गृहीतवद्भ्यः सर्वेभ्यः प्रतिभागिभ्यः परिषद्पक्षतः अहं कृतज्ञतां प्रकटयामि। विशेषतः यस्य प्रेरणया निर्देशने च अस्याः महत्त्वपूर्णायाः योजनायाः कार्यमिदं सम्भवं समभवत् तस्मै प्रेरणाप्रदात्रे तत्कालीननिर्देशकाय प्रोफेसरकृष्णकुमाराय सहृदयं कृतज्ञता अस्माभिः समर्प्यते। आशासे यदस्य पुस्तकस्य प्रचार-प्रसारणात् राज्यस्तरीयसंस्थाः भाषासम्बद्धप्रश्नानां विषये गभीरचिन्तनार्थं प्रेरिताः भविष्यन्ति।


**सन्ध्यासिंह**

आचार्या भाषाशिक्षाविभागाध्यक्षा च

राष्ट्रिय-शैक्षिकानुसन्धानप्रशिक्षण-परिषद्

# पुस्तक निर्माण समिति

**लेखनं समन्वधनञ्च**

संध्या सिंहः

आचार्य अध्यक्षाच भाषा शिक्षाविभाग: एन.सी. ई.आर.टी.

**साहाय्यम्**

कीर्तिः कपूरः

आचार्य भाषा शिक्षाविभाग: एन.सी. ई.आर.टी.

**अनुवादकः**

वेदप्रकाशमिश्रः

शिक्षाधिकारी

भारतीय-शिक्षा-बोर्ड्

- शिक्षायाः माध्यमं मातृभाषा भवति चेत् सा भाषिकीं सांस्कृतिकीं च दूरतां न्यूनीकर्तुं प्रभवेत्। बालानां गृहभाषां विद्यालयीयभाषया सह संयोजयितुं विद्यालयस्य प्रथमा भूमिका स्यात्।
- प्राथमिकी शिक्षा वस्तुतः भाषाशिक्षणम् अस्ति। अपि च गणितस्य, पर्यावरणस्य, समाजस्य प्रारम्भिकी शिक्षा मातृभाषया एव सम्यक्तया आसादयितुं शक्यते।
- मातृभाषया/ क्षेत्रीयभाषया च शिक्षा प्रत्येकं स्तरे प्रचलेत्। यतो हि आभिः भाषाभिः क्षमताविकासेन बालानां मानसिक-विकासस्य सम्प्रेषणस्य च सर्वाणि द्वाराणि उद्घाटितानि भवन्ति, येन पारस्परकिसंबंधाः स्वस्थाः भवन्ति, तथा च अवधारणात्मक-स्पष्टता वर्धते।
- प्रारम्भिकशिक्षायाः माध्यमं बालानां मातृभाषा भवेत् चेत् तेषां पूर्वज्ञानस्य भाषिकक्षमतायाः मानसिकविकासस्य च सुष्ठु उपयोगः कर्तुं शक्यते।
- सर्वात्मभावेन प्रयासः क्रियेत यत् बालानां गृहभाषायाः पारिपार्श्विकवातारणस्य भाषायाः विद्यालयस्य भाषायाः च मध्ये एकं संयोजनम् अथवा सेतुनिर्माणं भवेत्। अपि च आङ्ग्लभाषामाध्यमेषु विद्यालयेषु अपि बालानां मातृभाषायाः परिवर्तनं विना एकमाध्यमात् अन्यमाध्यमं प्रति गमनागमनं सुकरं भवेत्।
- विद्यालयीशिक्षायाः समये बहुभाषिशिक्षायाः प्रोत्साहनं भवेत् इति सर्वतोभावेन प्रयासः करणीयः।

*– भारतीयभाषानां शिक्षणम् (आधारपत्रम्), रा.शै.अ.प्र.प.*

*प्रथम-संस्करणम्*

# कृतवेदित्वम्

राष्ट्रीयशैक्षिकानुसंधानप्रशिक्षणपरिषद् भाषाशिक्षाविभागः, एन.सी.ई.आर.टी., नवदिल्ली; यूनिसेफ इति पटना; आर.आई.ई., भुवनेश्वर; आर.आई.ई. मैसूरु; आर.आई.ई., अजमेरः; एस.सी.ई.आर.टी., पटना; विद्याभवनसोसायटी, उदयपुरम्; काशीहिन्दूविश्वविद्यालयः, वाराणसी इत्येतेषां विषयविशेषज्ञानाम् आभारी अस्ति।

अनीता रामपालः, आचार्यः, शिक्षाविभागः(सी.आई.ई), दिल्ली-विश्वविद्यालयः, दिल्ली, अरुण-कमलः, आचार्यः, पटनाविश्वविद्यालयः, पटना, रमाकान्तः अग्निहोत्री, आचार्यः, भाषाविज्ञानविभागः, दिल्लीविश्वविद्यालयः, दिल्ली, रोहितः धनकरः, निदेशकः, दिगंतरः, जयपुरम्, एच.के. दीवानः, कार्यक्रमनिदेशकः, विद्याभवनसोसायटी, राजस्थानम्, राजेश-सचदेवाः, आचार्यः, सी.आई.आई.एल. मैसूरु; हसन-वारिसः, पूर्वनिदेशकः, एस.सी.ई.आर.टी. पटना; प्रियदर्शनः, समाचारसम्पादकः, एन.डी.टी.वी. भारतम्, नवदिल्ली; अवधेश- प्रधानः, आचार्यः हिन्दीविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी; अहमद-सज्जादः, पूर्वाचार्यः, राँचीविश्वविद्यालयः, राँची, शुभ-रावः, संयोजकः, महिलाध्ययनम् एवं विकासकेन्द्रम्, काशीहिन्दूविश्वविद्यालयः, वाराणसी, रियाज-अहमदः, उपकुलपतिः, विद्याभवनसोसायटी, राजस्थानम्, प्रेमपालशर्मा, संयुक्तसचिवः, रेलभवनम्, रेलमंत्रालयः, नवदिल्ली, सदानन्दः शाही, आचार्यः, हिन्दीविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी; ज्ञानदेवमणिः त्रिपाठी, प्राचार्यः, तपेन्दु-उच्चाध्ययनसंस्थानम्; एस. रघुनाथन् पूर्वशिक्षासचिवः, दिल्लीसर्वकारः; अपूर्वानन्दः, आचार्यः हिन्दीविभागः, दिल्लीविश्वविद्यालयः, राजेशभूषणः, सचिवः सूचना एवं प्रसारणमंत्रालयः, पटना; शारदा कुमारी, वरिष्ठप्रवक्ता, एस.सी.ई.आर.टी., नई दिल्ली; उषा शर्मा, सहाचार्यः, आर.आई.ई., अजमेरः, नूतनः झा, शिक्षकः, मीराम्बिका विद्यालयः, नवदिल्ली, मणिन्द्रनाथः ठाकुरः, सहाचार्यः, जे.एन.यू.; आचार्यः कृष्णकुमारः, निदेशकः, रा.शै.अ.प्र.प., नवदिल्ली; रामजन्मशर्मा, आचार्यः अध्यक्षश्च, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प., नवदिल्ली; ए.के. मिश्रा, आचार्यः एन.ई.आर.आई.ई., शिलांगम्; संध्या सिंहः, आचार्या भाषाशिक्षाविभागः, रा.शै.अ.प्र.प., नवदिल्ली; कीर्तिः कपूरः, वरिष्ठप्रवक्ता, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प., नवदिल्ली; एतेषां समेषां प्रति परिषत् कार्तज्ञ्यं प्रकटयति।

परिषद् उत्तरप्रदेशः, बिहारः, झारखण्डः, उत्तराखण्डः, गुजरातः, मध्यप्रदेशः,

छत्तीसगढम्, हरियाणा, महाराष्ट्रम्, कर्नाटकः, राजस्थानम् तथा च दिल्ली एतेषां प्रदेशस्थानां शिक्षकानाम्, शिक्षक-प्रशिक्षकाणां कृते, तथा च पुस्तकस्य विकासे विभिन्नचरणेषु सहयोगार्थम् रुचिः सैनी, नरेन्द्रः वर्मणः च कृते, डी.टी.पी. आपरेटर; राधा, प्रतिलिपिसंपादिका तथा च धनंजयसिंहः, उपेंद्रसिंहसत्यार्थी, परियोजनाध्येतॄणाञ्च कृते कार्तज्ञ्यं प्रकटयति।

*परिवर्द्धित संस्करणम्*

# कृतवेदित्वम्

समन्वध्नाधिं डॉ. संध्या सिंह, आचार्या भाषाशिक्षाविभागाध्यक्षा च, राष्ट्रियशैक्षिकानुसंधान प्रशिक्षण परिषद्, अस्मिन् नवीनसंस्करणे डॉ. वेदप्रकाशमिश्रः (अनुवादकः), प्रो. जतीन्द्रमोहनमिश्रः एवं डॉ. आभा झा (समीक्षिकौ ), जितिनकुमारः (कनिष्ठपरियोजनासहायकः), बालमुकुंदः (वरिष्ठशोधाध्येता),अमजद हुसैनः (ग्राफिक डिजाइनर) एतेषां योगदानम् अभवत्।

# विषयसूची

**आमुखम्** (परिवर्द्धित-संस्करणम् iii
(प्रथम-संस्करणम्) v
**प्राक्कथनम्** vii

1. **शिक्षासंबन्धिषु विधिकलेख्येषु भाषा** **1-12**
   - शिक्षायोगस्य प्रतिवेदनम् विद्यालयीपाठ्यचर्या- १९६४-६६
   - राष्ट्रियशिक्षानीति: - १९६८
   - राष्ट्रियशिक्षानीतिः – १९८६
   - क्रियान्वयनस्य कार्यक्रम -१९९२
   - राष्ट्रियपाठ्यचर्याया: रूपरेखा- १९८८, २०००
   - राष्ट्रियपाठ्यचर्याया: रूपरेखा- २००५
   - राष्ट्रियशिक्षानीतिः –२०२०
2. **भाषा अवबोधश्च** **13-21**
   - बालानाम् अवबोध: भाषा च
   - अवबोधस्य आधाररूपेण भाषा
   - भाषा सामाजिकसमता च
   - बालानाम् अस्तित्वस्य प्रश्न:
   - सार्थकशिक्षाया: प्रयास:
3. **बहुभाषिकता** **22-32**
   - बहुभाषिकताया: उद्देश्यम्
   - बालानाम् भाषाक्षमता
   - सार्वभौमिकव्याकरणस्य परिकल्पना
   - बहुभाषिकता अल्पसंख्यकाः आदिवासिभाषाश्च
   - बहुभाषिकता दक्षिणभारतीयभाषाश्च
   - बहुभाषिककक्षा
   - बहुभाषिकताया: समाह्वानानि

**4. विषयाणां केन्द्रे भाषा** **33-47**

- ➤ इतिहासस्य वातायनेन
- ➤ सर्वेषां विषयाणाम् अध्यापकाः भाषाध्यापकाः
- ➤ चिन्तनस्य स्वातन्त्र्यम् मौलिकतायाः प्रश्नश्च
- ➤ भाषाः अन्ये विषयाश्च
- ➤ प्राविधिक-शब्दावली बालानां बोधश्च
- ➤ उच्चशिक्षा अन्ये विषयाश्च

**5. भाषासु संवादः** **48-54**
(सन्दर्भः आङ्ग्लं हिन्दी च)

- ➤ आङ्ग्लभाषा-हिन्दीभाषयोश्च सम्बन्धः
- ➤ १९६७ ईस्वीयानन्तरम्
- ➤ १९८७ ईस्वीयवर्षस्य कालः
- ➤ परिवर्तनस्य नवीनयुगम्
- ➤ आङ्ग्लभाषायाः विकासस्य इतिहासः
- ➤ नूतनशब्दानां निर्माणस्य आवश्यकता

**6. अभिप्रायाः आह्वानानि च** **55-63**

- ➤ शिक्षकस्य सन्नद्धता
- ➤ सामाजिकी सन्नद्धता
- ➤ प्राशासनिकी सन्नद्धता

**परिशिष्टम् – १** **64-66**

**सन्दर्भाः** **67-68**

# १

# शिक्षासम्बन्धिषु विधिकलेख्येषु भाषा



- **शिक्षायोगस्य प्रतिवेदनम् विद्यालयीपाठ्यचर्या- १९६४-६६**
- **राष्ट्रियशिक्षानीतिः - १९६८**
- **राष्ट्रियशिक्षानीतिः – १९८६**
- **क्रियान्वयनस्य कार्यक्रम -१९९२**
- **राष्ट्रियपाठ्यचर्यायाः रूपरेखा- १९८८, २०००**
- **राष्ट्रिय पाठ्यचर्यायाः रूपरेखा- २००५**
- **राष्ट्रियशिक्षानीतिः –२०२०**

अस्माकं द्वौ ओष्ठौ स्तः। उभौ परस्परं मिलतः। तौ जिह्वया सह मिलित्वा लयेन सञ्चालितौ भवतः चेत् भाषा उत्पद्यते। उभयोः एकस्य स्पन्दनं विना संवादः असम्भवः स्यात्। (भाषाविषये कवेः दृष्टिः) १९७१ तमवर्षस्य गणनानुसारं अस्माकं देशे प्रायः १६५२ भाषाः सन्ति। तासु केवलं ४७ भाषाः एव विद्यालयेषु बालानां बोधस्य माध्यमरूपेण प्रभाविताः सन्ति (स्रोतः - भारतीय भाषाओं का शिक्षण – २००५) अन्याः सर्वाः निश्चलाः मौनभावं धारयन्ति । सम्भवतः अद्य एताभ्यः बहूनां भाषाणाम् अस्तित्वं न स्यात्। किम् अयं मौनभावः कासाञ्चन भाषाणां माध्यमरूपेण अप्रयोगस्य एव मौनभावः अथवा अयं मनोभावः अनेकानां संस्कृतीनां समाजानां भाषाणां कोटिमितानाञ्च बालानां नित्यमौनभावस्य लक्षणम् अस्तीति विचारणीयः।

काऽपि भाषा स्वसहयोगिभाषाभिः सहैव विकसिता भवति इति अस्माभिः विचारणीयम्। 'हिन्दीभाषायाः एव विचारं कुर्मश्चेत् हिन्दी अनेकक्षेत्रीयभाषाभ्यः उद्भूता इति अस्माभिः विचारणीयम्। सर्वाभिः सहभाषाभिः सह कूजन्त्या अग्रेसरन्त्या भाषया परिपालितानां बालानाम् अभिव्यक्तिः तेषां स्वभाषया

भवेदिति निश्चेतव्यम्। अस्माकम् अनेकाः मौनं तिष्ठन्त्यः भाषाः एतादृशस्य उपक्रमस्य कृते अपेक्षमाणाः सन्ति यस्मिन् द्वौ ओष्ठौ मिलेताम् (अर्थात् बालानां बोधस्य भाषायाश्च सामञ्जस्यं भवेत्) भाषायां लोकतान्त्रिकं स्थानं च स्यात्। स्वातन्त्र्योत्तरविगतसर्वशिक्षासम्बन्धिविधिकलेख्येषु मातृभाषायाः बोधस्य माध्यमरूपेण (विशेषतः प्राथमिकशिक्षायाम्) कार्यन्वयनार्थं संस्तुतिः कृता अस्ति तथा च बालानां बोधाय सहायिकायाः तेषां स्वभाषायाः तेषां स्वतन्त्राभिव्यक्तेः च कृते महत्त्वं प्रतिपादिम् अस्ति। विभिन्नविधिकलेख्येषु प्रदत्ताः भाषासम्बन्धिप्रस्तावाः अधोलिखिताः सन्ति।

## शिक्षायोगस्य प्रतिवेदनम्: विद्यालयीयपाठ्यचर्या – १९६४-६६

अद्यत्वे प्राथमिकशिक्षायां यस्य आधारभूतप्रश्नस्य अस्माभिः समाधानं करणीयम्, तदस्ति मातृभाषया सम्यक् अध्यापनं निरक्षरतायाश्च समापनम्। उद्योगदृष्ट्या उन्नतदेशेष्वपि आदौ प्राथमिकशिक्षायाः सम्पूर्णः पाठ्यक्रमः केवलम् एकस्याः भाषायाः अध्ययनोपरि आधारितः आसीत्। शिक्षायाः विकासात् आर्थिकस्थितेः च समृद्धेरनन्तरं शासनव्यवस्थया प्राथमिक्याम् अवस्थायां द्वितीयभाषायाः प्रारम्भः कृतः।

* * *

अस्माकं दृढो विश्वासः यत् आंग्लभाषासमं वैदेशिकभाषायाः अधिगमनात् पूर्वं मातृभाषायां दक्षता प्राप्तव्या। एतदतिरिच्य निम्नप्राथमिकवर्गेषु आङ्ग्लभाषायाः प्रभाविशिक्षणार्थं, येषु वर्गेषु कोटिशो छात्राणां नामाङ्कनं भवति, तत्र बहूनां प्रशिक्षितानां शिक्षकाणां आवश्यकता भविष्यति; परन्तु ते न उपलभ्यन्ते। यदि उपलभ्यन्ते चेदपि शिक्षायाः कृते यावत् धनं निर्धारितं तदपेक्षया बहुगुणस्य धनस्य आवश्यकता भविष्यति। अस्माकं मते एतत् विशालं कार्यम् अस्ति। व्यर्थतया तस्यानुसरणं कृते सति विद्यालयस्तरे आङ्ग्लभाषायाः मानकं न वर्धयिष्यते अपितु न्यूनतामेव आगमिष्यति। अतः वयं अनुशंसयामः यत् आङ्ग्लभाषायाः विदेशीयभाषारूपेण अध्ययनं केवलं केषुचित् विद्यालयेषु प्रयोगात्मकरूपेण व्यतिरिच्य पञ्चमश्रेण्याः पूर्वं न आरम्भणीयम्।

– *शिक्षायोगस्य प्रतिवेदनम्, १९६४-६६, पृष्ठाङ्कः २१८-२१९*

## शिक्षासम्बन्धिनी राष्ट्रियनीतिः – १९६८

भारतीयभाषाणां साहित्यानाञ्च समुचितविकासः शैक्षिकसांस्कृतिकविकासश्च अन्योन्याश्रितौ स्तः। एतेन विना जनानां सृजनात्मकशक्तिः विकसितुं न शक्नोति, शिक्षायाः स्तरः न वर्धयिष्यते, सामान्यजनान् यावत् ज्ञानस्य उपलब्धिः न भविष्यति तथा च सामान्यजनानां शिक्षितानाञ्च मध्ये यत् पार्थक्यं वर्तते तत् पूर्ववदेव स्थास्यति; प्राथमिक-माध्यमिक-स्तरयोः अनेकाः भाषाः पूर्वमेव शिक्षण-माध्यमरूपेण उपयुज्यन्ते। उच्चशिक्षायाम् अपि एतस्याः कार्यान्वयनम् आवश्यकम् इति प्रतिभाति।

**हिन्दी :** हिन्दीभाषायाः विकासाय यथासम्भवं प्रयासो विधातव्यः। धारा एकपञ्चाशदुत्तरत्रिशतम् (३५१) इत्याधारेण हिन्दीभाषां संचारभाषारूपेण भारतस्य सामासिकसंस्कृतेः अभिव्यक्तेः माध्यमरूपेण संवर्धनस्य आवश्यकता वरीवर्ति। सम्प्रति अहिन्दीभाषिषु राज्येषु उच्चशिक्षार्थं शिक्षायाः माध्यमं हिन्दीभाषां कुर्वन्तः सन्ति, एतस्य संवर्धनं करणीयम्। (टिप्पणी – एतत्सर्वासु भारतीयभाषासु प्रवर्तयितुं शक्यते।)

**अन्ताराष्ट्रियभाषाः :** आङ्ग्लभाषायाः अन्याषां च अन्ताराष्ट्रियभाषाणां अध्ययनार्थं विशिष्टावधानस्य आवश्यकता भविष्यति। विशेषतः विज्ञान-प्रौद्योगिकी-क्षेत्रे विश्वस्य ज्ञानं निरन्तरं वर्धमानम् अस्ति। न केवलं एतेन विकासेन सह भारतस्य संगमनं प्रयोजनम्, अपितु तस्मिन् विकासे महत्त्वपूर्णं योगदानमपि भारतेन दातव्यम्। एतदर्थं आङ्ग्लभाषायाः ज्ञानं विशेषतया सुदृढं करणीयं भविष्यति।

*– राष्ट्रियशिक्षानीतिः - १९६८ पृष्ठम् ३-४*

त्रिभाषासूत्रस्यापि वार्ता अष्टषष्ट्युत्तरैकोनविंशतितमायां (१९६८) नीतौ प्राबल्येन कथितम्। यं राष्ट्रियपाठ्यचर्यायाः रूपरेखायां (२००५) इत्थं प्रतिपादितम् –

### त्रिभाषासूत्राणि

- विद्यालये पाठनीया **प्रथमा भाषा** मातृभाषा अथवा क्षेत्रीयभाषा स्यात्।
- **द्वितीया भाषा**

– हिन्दी-भाषिषु राज्येषु द्वितीया भाषा काचिदपि अन्या आधुनिकभाषा अथवा आङ्ग्लभाषा भवेत्।
– अहिन्दी-भाषिषु राज्येषु द्वितीया भाषा हिन्दी अथवा आङ्ग्लभाषा भविष्यति।

- **तृतीया भाषा**
  – हिन्दी-भाषिषु राज्येषु तृतीया भाषा आङ्ग्लभाषा भविष्यति अथवा एका आधुनिकभारतीयभाषा भविष्यति या द्वितीयभाषारूपेण न पाठ्यमाना स्यात्।
  – अहिन्दीभाषिषु राज्येषु तृतीया भाषा आङ्ग्लभाषा भविष्यति अथवा एका आधुनिकभारतीयभाषा भविष्यति या द्वितीयभाषारूपेण न पाठ्यमाना स्यात्।

*– भारतीयभाषाणां शिक्षणम् – आधारपत्रम्, पृष्ठम् १३*

## राष्ट्रियशिक्षानीतिः – १९८६

षडशीत्युत्तरैकोनविंशतितमवर्षस्य (१९८६) शिक्षानीतौ अष्टषष्ट्युत्तरैकोनविंशतितम-वर्षस्य १९६८ शिक्षानीतेः आधारेण भाषाशिक्षासम्बद्धानां विषयाणां चर्चा कृता अस्ति। एषा नीतिः उच्चशिक्षास्तरे अपि माध्यमभाषारूपेण क्षेत्रीयभाषायाः प्रयोगम्, त्रिभाषासूत्राणां दृढतया कार्यान्वयनम्, शिक्षायां सर्वेषु स्तरेषु बालानां भाषाविकासोपरि अवधानं च समर्थयति। आङ्ग्लभाषायाः अन्याषां वैदेशिकभाषाणां च अध्ययनार्थं सुविधाः प्रदातव्याः। सम्पर्कभाषारूपेण हिन्दीभाषायाः विकासस्य व्यवस्था विधेया यथा संविधानस्य एकपञ्चाशत्त्रिंशदीस्वीयतमे (३५१) अनुच्छेदे निहिता अस्ति। एकस्याः भाषायाः अपरायां भाषायां पुस्तकानां अनुवादः कर्तव्यः, द्विभाषिकबहुभाषिकशब्दकोशेषु च गम्भीरतापूर्वकं कार्यं कर्तुं आवश्यकता वर्तते।

*– क्रियान्वयनस्य कार्यक्रमः – १९९२, पृष्ठम् ९४*

षडशीत्युत्तरैकोनविंशतितमवर्षस्य (१९८६) नीतिकार्यान्वयनस्य परामर्शे भारतीय-भाषाणां विकासेन सम्बन्धिताः केचन महत्त्वपूर्णाः परामर्शाः सन्ति –

1. आधुनिकभारतीयभाषासु पाठ्यसामग्री/सन्दर्भपुस्तकानि निर्मीय तेषां प्रकाशनं करणीयम्।
2. विश्वविद्यालयस्थानां प्राध्यापकानां अभिमुखीकरणं करणीयम्।
3. पाठ्यपुस्तकानां सन्दर्भपुस्तकानाञ्च अनुवादः आंग्लभाषातः भारतीयभाषासु करणीयः।

क्रियमाणानां कार्याणां सततं समीक्षापि विधेया।

**पटनायकः-१९८६ ( अ )**

- विद्यालयीयशिक्षायाः माध्यमिके अथवा उच्चतरस्तरे शिक्षायाः माध्यमः क्रमशः क्षेत्रीयभाषा अथवा राज्यस्तरीयभाषा अथवा हिन्दीभाषा अथवा आंग्लभाषा भवितुं शक्नोति।
- अस्माकं मते प्राथमिकशिक्षा मुख्यतः भाषाशिक्षा वर्तते, अतः मातृभाषा अथवा क्षेत्रीयभाषा अपि अनिवार्यविषयत्वेन पाठनीया भवेत्।
- मानवेषु भाषाम् अधिगन्तुम् असीमिता क्षमता वर्तते, विशेषतः यदा ते अल्पवयस्काः भवेयुः। यदि पर्याप्ताः सुविधाः उपलभ्यन्ते चेत् प्राथमिकस्तरे अपि आङ्ग्लभाषायाः पाठनं कर्तुं शक्यते। कतिपयवर्षाणि यावत् आङ्ग्लभाषायाः शिक्षां प्रदायैव वयं बहुभाषिकसन्दर्भे आङ्ग्लभाषाध्ययनस्य, संरचनायाः ज्ञानस्य च मानकं स्तरं वाञ्छामः। सामान्यावधारणायाः विपरीतम् भाषाः परस्परम् भावयन्तः एव विकसिताः भवन्ति।
- त्रिभाषासूत्रे तिस्रः भाषाः न्यूनतमाः सन्तीति स्पष्टं विज्ञायते। एतदेतस्य सूत्रस्य ऊर्ध्वतमा सीमा नास्ति। संस्कृतं आधुनिकभारतीयभाषारूपेण पठनीया, यत्र एतस्य स्वरूपं शास्त्रीयसंस्कृतात् बहुभिन्नं भवितुमर्हति।
- शास्त्रीयभाषाः वैदेशिकभाषाश्च स्वप्रकृत्यानुसारेण पाठनीया। एताः व्याकरणस्य जटिलतायाः नूतनां सम्भावनां समुत्पादयन्ति। समाजस्य मुख्यधाराभिः विच्छिन्नाः परम्पराः, संस्कृतयः, जनाश्च भाषामाध्यमेन योजयितुं शक्यन्ते।

*– भारतीयभाषाणां शिक्षणम् – आधारपत्रम्, पृष्ठम् १६*

## क्रियान्वयनस्य कार्यक्रमः – १९९२

## व्यावहारिकत्रिभाषासूत्रस्य आधारः

व्यावहारिकत्रिभाषासूत्रस्य निर्माणे निम्नलिखितमार्गदर्शकसिद्धान्तैः साहाय्यं प्राप्तुं शक्यते –

1. यावत्कालम् आङ्ग्लभाषा विश्वविद्यालयस्तरस्य मुख्यशिक्षणमाध्यमं तथा केन्द्रे अनेकेषु राज्येषु च प्रशासनिकभाषायां स्थास्यति तावत्पर्यन्तं सा उच्चस्थानं प्राप्स्यति। विश्वविद्यालयेषु क्षेत्रीयभाषाणां उच्चशिक्षायाः माध्यमं संजातेष्वपि आङ्ग्लभाषायाः व्यावहारिकज्ञानं सर्वेषां छात्राणां कृते अतीव उपयोगि भविष्यति तथा च विश्वविद्यालये प्रवेशार्थम् इच्छावतां छात्राणां कृते तस्या भाषायाः ज्ञानम् आवश्यकं भविष्यति।
2. विद्यालये कस्याश्चिद् भाषायाः अध्ययने कियती योग्यता प्राप्तुं शक्यते, वार्तैषा न केवलमिदम् अभिप्रैति यत् कियन्ति वर्षाणि भाषा शिक्ष्यते, अपितु एतस्मिन्नपि आश्रितं भवति यत् छात्राणां पुरतः काः अभिप्रेरणाः आसन्, भाषा कस्मिन् स्तरे शिक्ष्यते, तथा समुपलब्धाः शिक्षकाः, उपागमाः, शिक्षणपद्धतयश्च कीदृशः सन्ति। समुचितसौविध्यानाम् अभावे दीर्घकालं यावत् भाषाधिगममपि उत्तमं परिणामं न ददाति, अनुकूलपरिस्थितौ तु अल्पकाले एव उत्तमं परिणामं प्राप्तुं शक्यते। यद्यपि अत्यल्पवयसि एव बालानां द्वितीयभाषाशिक्षणस्य पक्षे तर्काः कर्तुं शक्यन्ते तथापि प्राथमिकविद्यालयेषु लक्षाधिकानां छात्राणां कृते भाषाशिक्षणार्थं योग्यशिक्षकाणां व्यवस्था अस्माकं दृष्ट्या अतीव कठिनं कार्यं भविष्यति।
3. हिन्दीभाषायाः अथवा आङ्ग्लभाषायाः द्वितीयभाषारूपेण अनिवार्यतः कस्याम् अवस्थायां समारम्भः भवेत् तथा च कियत्कालं यावत् तस्याः पाठनं करणीयम्, एतत् स्थानीयाभिप्रेरणायाम् आवश्यकतायां च समाश्रितो भवति, अतः एतत् प्रत्येकं राज्येन स्वविवेकानुसारं निर्धारणीयम्।
4. कस्यामपि अवस्थायां चतुर्णां भाषाणाम् अध्ययनं अनिवार्यं न भवेत्, परन्तु स्वेच्छया चतुर्णां ततोऽधिकानां वा भाषाणाम् अध्ययनस्य सौविध्यं प्रदातव्यम्।

*– क्रियान्वयनस्य कार्यक्रमः – १९९२*

## राष्ट्रियपाठ्यक्रमस्य रूपरेखा – १९८८, २०००

१९८८ ईश्वीयतमे वर्षे २००० ईश्वीयतमे वर्षे च राष्ट्रियपाठ्यक्रमरूपरेखासु प्रस्तावितं यत् 'विद्यालयस्य सर्वेषु स्तरेषु अथवा न्यूनातिन्यूनं प्राथमिकस्तरपर्यन्तं शिक्षणस्य माध्यमं मातृभाषा अथवा क्षेत्रीयभाषा भवेत्' (एन.सी.एफ.एस.ई.–२०००) परन्तु अत्र मातृभाषायाः प्रादेशिकभाषायाश्च मध्ये विद्यमानभेदस्य गम्भीरसमस्या उपेक्षिता अस्ति। अस्यां रूपरेखायाम् उक्तं यत् यदि क्षेत्रीयभाषा छात्राणां मातृभाषा नास्ति तर्हि प्राथमिकवर्षद्वयं यावत् शिक्षा मातृभाषायाः माध्यमेन कर्तुं शक्यते। तृतीयकक्षातः, तदनन्तरञ्च 'क्षेत्रीयभाषाः माध्यमभाषारूपेण स्वीकर्तुं शक्यते' (एन.सी.एफ. एस.ई.–२०००)

*– भारतीयभाषाणां शिक्षणम् – आधारपत्रम्, पृष्ठम् १५-१६*

## राष्ट्रियपाठ्यचर्यायाः रूपरेखा – २००५

अद्यत्वे वयं निश्चयेन जानीमः यत् द्विभाषिकतया बहुभाषिकतया वा निश्चितरूपेण संज्ञानात्मकलाभाः भवन्ति। त्रिभाषासूत्राणि भारतस्य भाषास्थितेः आह्वानानि अवसरानि च सम्बोधयितुं प्रयत्नानि सन्ति। एषा एका रणनीतिः। यया बहुभाषाशिक्षणस्य मार्गं प्रशस्तं करणीयम्। एनं कार्ये भावे चोभयत्र ग्रहणस्य आवश्यकता वर्तते। अस्य प्राथमिकम् उद्देश्यम् अस्ति- भारते बहुभाषावादस्य राष्ट्रसौहार्दस्य च प्रसारः। निम्नलिखिताः दिङ्निर्देशाः एतेषां लक्ष्याणां प्राप्तौ सहायकाः भवितुम् अर्हन्ति –

- भाषाशिक्षणं बहुभाषिकं भवेत्, न केवलं बहुभाषाशिक्षणस्य अर्थे, अपितु योजना-नीतिदृष्ट्यापि, येन बहुभाषिककक्षाः एकस्मिन् संसाधनरूपेण उपयुक्ताः भवेयुः।
- बालानां गृहभाषाः, यथा ३.१ मध्ये परिभाषिता अस्ति, विद्यालये शिक्षणस्य माध्यमं भवेत्।
- यदि विद्यालयेषु उच्चतरस्तरीया शिक्षा बालानां गृहभाषामाध्यमेन प्रदातुं सौविध्यं न स्याच् चेत् प्राथमिकस्तरीया शिक्षा गृहभाषामाध्यमेन एव प्रदत्ता भवेत्। एतदपि आवश्यकं यत् वयं बालानां गृहभाषायाः सम्मानं करवाम। अस्माकं

संविधानस्य धारा ३५०-ए इत्यस्य आधारेण 'प्रत्येकं राज्यं राज्यस्यान्तः प्रत्येकं स्थानीयं प्राधिकारी च भाषाविषयक-अल्पसंख्यकसमूहेभ्यः सम्बद्धानां बालानां शिक्षायाः कृते प्राथमिकस्तरे मातृभाषायां शिक्षणस्य पर्याप्तसौविध्यानां व्यवस्थां प्रदातुं प्रयतते'।

*– राष्ट्रियपाठ्यचर्यायाः रूपरेखा – २००५, पृष्ठम् ४२*

अतः राष्ट्रियपाठ्यचर्यायाः रूपरेखायै (२००५) निर्मितः शैक्षिकसमूहः 'भारतीयभाषाणां शिक्षणम्' अस्मिन् विषये परामर्शं ददाति। यत् विद्यालयस्तरे विशेषरूपेण प्राथमिकस्तरस्य शिक्षायायाम् अनुदेशानाम् माध्यमः मातृभाषा एव भवेत्। १९८६ ईश्वीयतमे वर्षे एन.सी.ई.आर.टी.-संस्थया भाषाध्ययनार्थं संगठितसमित्या परामर्शः प्रदत्तः, यत् प्राथमिकशिक्षायां माध्यमरूपेण केवलं मातृभाषा एव प्रयोक्तव्या इति। भारतीयसन्दर्भे इदम् अत्यावश्यकं भवति यतोहि–

- एषा राष्ट्रियपुनर्निर्माणे जनान् भागमधिग्रहीतुं समर्थयति।
- केवलं केचन आभिजात्यवर्गीयाः एव ज्ञानस्य अधिकारिणः न भवेयुः अपितु ज्ञानस्य कपाटः सर्वेषां कृते उद्घाटितः भवेत्।
- एषा परस्परं सहकारिणं अन्योन्याश्रितं च समाजं निर्मातुं साहाय्यं करोति।
- अधिकाधिकजनानां कृते स्वमतं प्रकटयितुं अवसरं प्रददाति, एतदर्थं लोकतन्त्राय उत्तमसुरक्षायाः आधारं दातुं प्रभावपूर्णा सिध्यति।
- सूचनायाः विकेन्द्रीकरणस्य मार्गं उद्घाटयति तथा च नियन्त्रितमाध्यमानां स्थाने स्वतन्त्रमाध्यमानां विकासे सहायकभूमिकां निर्वहति। एतेन सहैव अधिकाधिकजनानां कृते शिक्षायै, व्यक्तित्वविकासाय च अवसरान् अपि प्रयच्छति।

*– भारतीयभाषाणां शिक्षणम् – आधारपत्रम्, पृष्ठम् १४-१५*

सर्वेषामेतेषां प्रलेखानां शोधानाञ्च अनेकानां परामर्शानां सत्वेऽपि अद्यत्वे प्रायः पञ्चसप्ततिः (७५) वर्षानन्तरमपि एतत् उद्देश्यं पूर्णं नाभवत्। एन.सी.ई.आर.टी.-संस्थया कृतेषु शोधकार्येषु द्वयोः भाषावैज्ञानिकशोधयोः (द्रष्टव्यम्, पृष्ठानि ५१-५४) माध्यमभाषाणां यथाराज्यं या रूपरेखा प्रस्तुता अस्ति, तस्याम् अधिकांशराज्येषु

बहव्यः भाषाः माध्यमभाषारूपेण प्रयुक्ताः सन्ति। **कर्गदपत्रे तु माध्यमभाषायाः कृते एताः अनुशंसाः, रूपरेखाः च उत्साहवर्धकाः सन्ति, परन्तु ताः अद्यापि गृहभाषायाः विद्यालयभाषायाः च मध्ये अन्तरं न पूरयन्ति।** एकस्मिन् पक्षे प्रतिदिनं गृहभाषायाः विद्यालयभाषायाश्च मध्ये अन्तरं वर्धमानं भवति स्म, अपरपक्षे आङ्ग्लभाषासहितभारतीयभाषासु संवादः अपि भग्नः अभवत् । मानसिकभारः एतावान् वर्धितः यत् बालानां स्वस्य अवबोधः, तेषां अभिव्यक्तिस्तरः अपि न्यूनः अभवत्। अत एव राष्ट्रियपाठ्यचर्यायाः रूपरेखायां (२००५) दृढतया पुनः कथनस्य आवश्यकता अभवत् यत् बालानां गृहस्य भाषा विद्यालये अपि तेषां अवबोधस्य माध्यमं भवेत् येन बालाः रटनं परित्यज्य अवबोधपूर्वकं पठने प्रवृत्ता स्युः। शिक्षा तेषां कृते भारः न भवेत् अपितु सुखदः अनुभवः भवेत्। एतत्तु स्पष्टं यदस्य पृष्ठे कश्चित् भ्रमः, बहवः मानसिकविभ्रमाश्च सन्ति।

एते पक्षाः मनसि निधाय एनसीईआरटीसंस्थायाः भाषाशिक्षाविभागः एकं उपक्रमं कृतवान्, तेन देशस्य शिक्षाविदैः शिक्षकैश्च सह मिलित्वा परिसंवादः प्रारब्धः। एषः संवादः पाटलिपुत्रम्, वाराणसी, उदयपुरम्, दिल्ली इत्यादिषु नगरेषु परिसंवादशृंखलारूपेण आयोजितः, यस्मिन् बालानां स्वभाषा एव तेषां अवगमनस्य माध्यमं भवेत् इति सर्वेषां सहमतिः अभवत्। परञ्च सर्वाधिका समस्या अस्याः कार्यान्वयनस्य अस्ति। एताभ्यः संगोष्ठीभ्यः इदमपि ज्ञातं यत् अस्मिन् क्षेत्रे व्यापकतया सज्जतायाः आवश्यकता भविष्यति। न केवलं शैक्षणिकं अपितु सामाजिक-प्राशासनिकभूमिकायाश्च सचेतनतया सज्जीकरणं करणीयं भविष्यति तथा च अवबोधस्य माध्यमविषये अवगमनस्य निर्माणे क्रियात्मकः आरम्भः करणीयः भविष्यति।

## राष्ट्रियशिक्षानीतिः २०२०

- सर्वे जानन्त्येव यत् लघुबालाः गृहभाषया / मातृभाषया वेगेन अर्थम् गृह्णन्ति अवधारयन्ति च। मातृभाषा सामान्यरूपेण स्थानीयजनैः व्यवह्रियमाणा एव भवति। किन्तु बहुभाषिकपरिवारेषु परिवारसदस्यैः भाष्यमाणा गृहभाषा भवितुम् अर्हति यतोहि क्वचित् मातृभाषा स्थानीयभाषातः भिन्ना अपि भवितुमर्हति। अपेक्षितानुसार

न्यूनातिन्यूनं पञ्चमस्तरपर्यन्तम् अथवा इदं वरं स्यात् अष्टमस्तरपर्यन्तम् अथवा तदग्रिमस्तरेषु च शिक्षायाः माध्यमः गृहभाषा / मातृभाषा / स्थानीयभाषा / क्षेत्रीयभाषा स्यात्। ततः परं गृहभाषायाः / स्थानीयभाषायाः संभवतः भाषारूपेण पाठ्यते। इदं सर्वकारीयविद्यालयेषु सार्वजनिकविद्यालयेषु अनुपाल्यते।

- अनुसंधानम् इदं दर्शयति यत् वर्षद्वयतः अष्टवर्षस्य आयुर्मध्ये विद्यमानाः बालाः अतिवेगेन भाषां अधीयते अनेकभाषिता एतद्वयोविद्यार्थिनां कृते ज्ञानात्मकलाभं प्रददाति इति। प्राथमिकस्तरतः आरभ्य बालानां कृते विभिन्नभाषाभिः (मातृभाषायाः कृते अधिकावदानेन सह) व्यवहर्तुं प्रोत्साह्यन्ते । सर्वाः भाषाः मनोरञ्जकतया संवादात्मकतया पाठ्यन्ते तत्र अधिकसंवादसंभाषणेन सह आरम्भिकवर्येषु मातृभाषया प्रारम्भिकपाठ्यक्रमस्य ततः परं मातृभाषया लेखनेन सह तृतीयस्तरे एवं तदग्रमिस्तरेषु च अन्यभाषया पठनलेखनकौशलस्य च विकासः क्रियते ।
- एतदर्थम् उच्चतरगुणयुक्तानां विज्ञानस्य गणितस्य विषये द्विभाषापाठ्यपुस्तकानां शिक्षणाधिगमसामग्रीणां संरचनार्थं प्रयासः क्रियते येन विद्यार्थी विषयद्वये गृहभाषया / मातृभाषया आङ्ग्लभाषया आलोचयितुं भाषितुं च सक्षमः स्यात्।
- भारतीयभाषाणां शिक्षणमधिगमञ्च विद्यालयस्य उच्चशिक्षायाञ्च प्रत्येक स्तरेण सह सम्बद्धः स्यात्। भाषाः प्रासङ्गिकाः जीविताच्च स्युः एतदर्थं भाषासु गुणवत्तापूर्णाधिगमः मुद्रणसामग्री सततप्रवाहिता स्यात् तत्र पाठ्यपुस्तकानि अभ्यासपुस्तकानि दृश्यग्रहणम्, नाटकानि, कविताः, उपन्यासः, पत्रिकाश्च अन्तर्भूताः सन्ति। भाषायाः शब्दकोशाः, शब्दभाण्डागार आधिकारिकरूपेण सततं नावीन्ययुक्ताः भवेयुः तस्य व्यापकः प्रचारः प्रसारोऽपि भवेत् येन सामयिकविषयं समस्यां च प्रभावरूपेण चर्चा कर्तुं शक्यते। विश्वस्य विभिन्नदेशः आङ्ग्लम् फ्रेंच, जर्मन, हिब्रू कोरियाई जापानी इत्यादिभाषासु अधिगमसामग्र्याः मुद्रणसामग्र्याश्च निर्माण तथा विश्वस्य विभिन्न भाषाणां महत्त्वपूर्ण-सामग्रीणाम् अनुवादः क्रियते। एवं शब्दभण्डार नियमेन नूतनीक्रियते। किन्तु अस्माकं भाषाणां संरक्षणाय एतादृशी अधिगमसामग्री, मुद्रणसामग्री तथा शब्दकोशादीनां निर्माणविषये भारतस्य गतिः अतीव मन्दा वर्तते।

- भारतीयभाषाणां संवर्धनं प्रसार-प्रचारश्च तदा संभविष्यति यदा तासां भाषाणां सतत संभाषणेन शिक्षणाधिगमप्रक्रियायाम् प्रयोगेणैव सर्वासु भारतीयभाषासु सजीवककविताः, उपन्यासाः, पाठ्यपुस्तकानि कथासाहित्यम्, पत्रकारिता इत्यादिषु उत्तमकार्यं भवेदिति निश्चेतुं उत्कृष्टकविता-गद्यादिनिमित्तं पुरस्कारव्यवस्था भविष्यति। औद्योगिकयोग्यतायाः अर्हतायाः वा मानदण्डरूपेण भारतीयभाषाप्रवीण्यमपि अन्तर्भावः क्रियते।

*–राष्ट्रियशिक्षानीतिः २०२०, मानवसंसाधनविकासमन्त्रालयः*

एतेषां सर्वेषां विधिकलेख्यानां शोधानाञ्च परामर्शानि सत्वेऽपि अद्य प्रायः पञ्चसप्ततिः (७५) वर्षाणाम् अनन्तरमपि एतत् पूर्णतया कर्तुं न शक्यते स्म। एन.सी.ई.आर.टी.संस्थया कृतं भाषासम्बद्धयोः शोधयोः (पृष्ठम्- ५१-५४, पश्यन्तु) अपि माध्यमभाषाणां क्रमशः यथाराज्यं रूपरेखा प्रस्तुता अस्ति, तत्र अधिकांश-राज्येषु बहव्यः भाषाः माध्यमभाषारूपेण व्यवह्निताः सन्ति। कर्गदपत्रे तु माध्यमभाषाणां कृते एताः अनुशंसाः, रूपरेखाश्च उत्साहवर्धिकाः सन्ति किन्तु अद्यापि ताः गृहभाषायाः विद्यालयभाषायाश्च अन्तरं न पूरयन्ति। अनुदिनं गृहभाषायाः विद्यालयभाषायाश्च भेदः वर्धमानः आसीत्। अपरस्मिन् पक्षे आङ्ग्लभाषासहितानाम् भारतीयभाषाणां मध्ये संचारः अपि भग्नः अभवत्। एतावान् मानसिकभारः वर्धितः यत् बालानां स्वस्य बोधः अभिव्यक्तिश्च कुत्रचित् दमितः एव अभवत् अत एव राष्ट्रियपाठ्यचर्यायाः रूपरेखायाम् (२००५) पुनः पुनः वक्तुम् आवश्यकता अभवत् यत् बालानां गृहभाषा विद्यालयेऽपि तेषाम् अवगमनाय शिक्षायाः माध्यमं भवतु येन बालकाः कण्ठस्थीकरणस्य स्थाने अवगमनेन पठनं प्रति उन्मुखाः भवेयुः। शिक्षा तेषां कृते भारः न भवेद् अपितु सुखदः अनुभवः भवेत्। अत्र ज्ञायते यद् अस्याधारभूमौ किञ्चिद् भ्रमः बहव्यः समस्याश्च सन्ति।

एते विषयाः मनसि निधाय एनसीईआरटीसंस्थायाः भाषाविभागेन एकः उपक्रमः कृतः, तेन देशस्य शिक्षाविदैः शिक्षकैश्च साकं परिचर्चा कृता। एषः संवादः पटना-वाराणसी-उदयपुर-दिल्ली-नगरेषु संवादमालारूपेण आयोजितः आसीत्, यस्मिन् बालानाम् अवबोधस्य माध्यमं बालानां स्वभाषा एव भवेत् इति सर्वेषां सम्मतिः आसीत्। परन्तु सर्वाधिका समस्या तस्याः कार्यान्वयनस्य अस्ति। एतेभ्यः सम्मेलनेभ्यः

अपि एतन्निष्कर्षभूतं तत्त्वं प्राप्तं यदस्मिन् क्षेत्रे व्यापकतया सज्जतायाः आवश्यकता भविष्यति। न केवलं शैक्षणिकस्य अपितु सामाजिकस्य प्राशासनिकस्य च भूमिकायाः सुष्ठुतया सज्जता कर्तव्या भविष्यति। अवबोधमाध्यमस्य अवगमननिर्माणे सक्रियः उपक्रमः भवितुमर्हति।

२

# भाषा अवबोधश्च



- **बालानाम् अवबोधः भाषा च**
- **अवबोधस्य आधाररूपेण भाषा**
- **भाषा सामाजिकसमता च**
- **बालानाम् अस्तित्वस्य प्रश्नः**
- **सार्थकशिक्षायाः प्रयासः**

भाषायाः अवबोधस्य च गहनसम्बन्धः अस्ति, परन्तु शिक्षायां अवबोधस्य आवश्यकता प्रायः निषेधीकृता आसीत्। गतवर्षेषु शिक्षासम्बद्धाः याः नवीनाः नीतयः संरचिताः तासु प्रथमवारं शिक्षायाम् अवगमनस्योपरि अवधानं प्रदत्तम्। इतः पूर्वम् अवबोध इति पदस्यापि स्पष्टम् अवगमनं नासीत्। ज्ञानस्य दान-ग्रहणयोः परम्परा प्रचलिता आसीत्। अद्यत्वेऽपि बहु किमपि प्रचलति। सर्वप्रथमं बालानां भाषा का अस्ति? अस्मिन् विषये अस्माभिः आत्मनः अवगमनं सुदृढं कर्तव्यम् –

## बालानाम् अवबोधः भाषा च

- विद्यालयम् आगमनात् पूर्वं बालाः भाषायाः माध्यमेनैव संसारस्य अनुभवं कुर्वन्ति।
- बालाः भाषां नावगच्छन्ति अपितु मनसि सृजनं कुर्वन्ति।
- बालाः अवगन्तुं क्षमतां धारयन्ति स्वयमपि च अवबोधं विकासयन्ति ।
- बालानां परितः बहुभाषाः समस्याः न सन्ति, अपितु संसाधनानि सन्ति। अनेकाः भाषाः शिक्षायां समानतायाः कार्यं कर्तुं शक्नुवन्ति।
- पाठ्यचर्या भाषा च यदा वैयक्तिकजीवनेन युज्येते तदा ते समृद्धे भवतः।
- षड्वर्षीयायाः बालिकायाः भाषापि अतीव जटिला भवितुम् अर्हति। तस्याः

सकाशे भाषायाः तादृशं व्याकरणं भवति यस्मिन् सा सर्वं व्यञ्जयितुं शक्नोति। यदि तस्याः उपरि माध्यमत्वेन अन्या भाषा आरोप्यते तर्हि तस्याः अवगमनं दृढं न भविष्यति।

**'चॉम्स्की'** महोदयस्य (1959) पुस्तकम् **'रिव्यू ऑफ स्किनर्स वर्बल बिहेवियर'** अस्ति, येन व्यवहारवादस्य आधारमेव समाह्वानपूर्वकं विखण्डितम्। 'चॉम्स्की' इत्यनेन उक्तं यत् भाषाक्षमता सहजतया जन्मना एव भवति, नो चेत् भाषाव्यवस्थाम् अधिगन्तुम् प्रक्रिया एव न सम्भाव्यते। परन्तु पियाजे (१९६२–१९८३), इनहेल्डर तथा पियाजे (१९५८) एवञ्च व्योगोत्स्की (१९७८, १९८६) इत्यादिभिः मनोवैज्ञानिकैः उभाभ्यां चरमदृष्टिभ्यामतिरिच्य एकः मध्यमार्गः चितः। यत्र व्यवहारवादिनां कृते, मानवमस्तिष्कं अलिखितपट्टमिव आसीत्, तत्रैव संज्ञानात्मकस्थितिवादिनां (चोम्स्की इत्यादिनाम्) कृते भाषा मानवमस्तिष्के पूर्वत एव विद्यमाना आसीत्, सा सार्वभौमिकव्याकरणरूपेण सुबद्धम् आसीत्। पियाजेमहोदयस्य मते भाषा अन्येषां संज्ञानात्मकतन्त्राणाम् इव पर्यावरणेन सह अन्तःक्रियामाध्यमेन एव विकसिता भवति ।

*– भारतीयभाषाणां शिक्षणम् – आधारपत्रम्, पृष्ठम् ८*

## अवबोधस्य आधाररूपेण भाषा

अवबोधस्य भाषायाश्च सम्बन्धः तथा भवति यथा वायोः तस्य तरङ्गस्य च। अस्माकं कृते अवबोधः स्वभाषायामेव भवति। भाषां विना अवबोधस्य परिकल्पना असम्भवम् अस्ति। परन्तु विद्यालयेषु भाषा 'उपकरण'रूपेण प्रयुज्यते। अस्माभिः अद्यापि अस्मिन् क्षेत्रे कार्यं करणीयम्, मानवानाम् अवबोधस्य एकमात्रं अत्यावश्यकं आधारं भाषा एव इति प्रत्ययोऽपि कारणीयः। वयं सम्प्रति किं कुर्मः? भाषा एव अस्मान् अस्मिन् विषये सचेष्टयति। वर्तमानात् अतीतं भविष्यं च गन्तुं एतत् एकमेव अत्यावश्यकं साधनम् अस्ति। ह्यः किम् आसीत् ? एतस्याः आधारेणैव कल्पयितुं शक्यते यत् अस्माकं कृते किमन्यत् आवश्यकम् इति। स्वस्य विषये विवेकपूर्वकं निर्णयं कर्तुं भाषा एव कार्यं करोति। मनुष्यानाम् एताः सर्वाः अवस्थाः स्वस्य परिवेशे

एव निर्मिताः भवन्ति, तथा च अस्याः संरचनायाः कार्यं केवलम् अवबोधेन एव सम्भवति। मनुष्यानाम् एषः अवबोधः भाषामात्रेण निर्मीयते। भाषायाः माध्यमेन एव वयं सार्थकसंकल्पनाः रचयामः, सम्बन्धानाम् अन्तर्जालं वयामः, स्वस्य अनुभवान् सार्थकतां यच्छामः, स्वस्याभिप्रायं पश्यामः, अन्येषां चाभिप्रायं अवगच्छामः। एतदर्थं मानवनिर्माणार्थं आवश्यकतत्त्वरूपेण भाषा अवबोधस्य माध्यमं भवति।

स्वकीयायाः भाषायाः संरचना बालानां चेतसि पूर्वतः एव भवति। अवधारणानां प्रारूपम् अनया भाषया निर्मितं भवति। यदा सः नूतनं वस्तु पश्यति तदा सः तत् स्वस्य पूर्वानुभवैः सह सम्बद्धं कृत्वा नूतनानि विशेषतानि आविष्करोति, तदा तस्य वस्तुनः अवधारणा निर्मीयते। यदा बालः वर्धते तदा सः ज्ञातवस्तुभिः अज्ञातवस्तूनि सम्बद्धीकर्तुं शक्नोति तद्विषये च वार्तामपि कर्तुं शक्नोति। एतत् भाषामाध्यमेन एव सम्भवति। अतः बालानां मनसि विद्यमानाः नवीनाश्च अवधारणाः विभिन्न-स्थितिषु प्रयोक्तुं अवसरो दातव्यः। तदा एव तस्य स्वस्यावबोधः भविष्यति।

एका बालिका उड्डयनं कुर्वन्तं मयूरं दृष्ट्वा 'कागा' इति वदति, तथा चलन्तं मयूरं दृष्ट्वा 'भौं भौं' इति वदति, अत्र सार्धैकवर्षीयायाः कन्यायाः अवधारणाः विकसिताः भवन्ति। अर्थात् तस्याः कृते उड्डयनं कुर्वन् पक्षी अस्ति, चलनशीलः पशुः चास्ति। षण्मासानन्तरं सा भित्तौ गच्छन्तीं गृहगोधिकाम् 'पल्ली' इति आह्वयति, यदा माता तां 'कागा' इति वदति तदा स्तब्धा भवति। इदानीं भेदः अधिकः स्पष्टः जातः। एषा एव तस्य शिक्षणस्य अवबोधनस्य च शैली अस्ति। किमपि दृष्ट्वा बालाः बहुधा पृच्छन्ति, 'किम् एतत् ?' ते अत्र शब्दान् न पृच्छन्ति अपितु अवधारणानां विषये एव पृच्छन्ति। बालाः यां भाषाम् आदौ वक्तुं आरब्धवन्तः, तया भाषया एव ते अवबोधं रचयन्ति, अर्थं कुर्वन्ति, सोऽर्थः तेषां कृते किम् महत्त्वम् आदधाति, एतदवगमनम् अस्माकं कृते महत्त्वपूर्णं वर्तते।

*– एकः प्रतिभागी*

## भाषा सामाजिकसमता च

सामुदायिकजीवनम्, भाषाः, मानवाः च गहनतया परस्परं सम्बद्धाः सन्ति। तथा चैतेषां नूतनसृजने महती भूमिका भवति। बालाः भाषायाः माध्यमेन स्वस्यानुभवान् संगृह्य तान् सार्थकान् कुर्वन्ति। एषा प्रक्रिया भाषायाः माध्यमेन एव भवति। एषा भाषा बालानां गृहस्य भाषा मातृभाषा वा भवितुम् अर्हति। अर्थात् सृजनस्य प्रथमः प्रयासः स्वस्यां भाषायामेव आरभ्यते। यतो हि ये शब्दाः भावात्मकाः आत्मीयाश्च सन्ति, ते स्वभाषायामेव आगच्छन्ति।

यदा बालाः प्रथमवारं विद्यालयम् आगच्छन्ति तदा तेभ्यः इदं शिक्ष्यते, यत् ते स्वभाषायां न वदेयुः, तेभ्यः शिक्षकैः विहितभाषायाम् एव वक्तव्यं भवति। एषा भाषा तादृशी भवति यस्यां ते अद्य प्रभृति न चिन्तितवन्तः, नैव चोक्तवन्तः। अस्य परिणामः अतीव भयङ्करः भवितुम् अर्हति । अस्माभिः अवधेयं यत् बालाः स्वमातृभाषायां आत्मानं सृजति। अस्यां भाषायामेव स्वस्य अनुभवानां व्याख्यामपि करोति। शिक्षायामेतस्याः अस्वीकृतिः न केवलं बालानाम् अस्वीकृतिः, अपितु सामाजिकसमानतायाः, सामाजिकन्यायस्य, स्वतन्त्रतायाश्च अस्वीकृतिः वर्तते। एषा प्रवृत्तिः बालानां सहजां स्वतन्त्राञ्च अभिव्यक्तिं वारयति, अनेन च बालानां मनसि अवसादः अपि सम्भाव्यते। यतोहि यदा शब्दाः न प्रादुर्भवन्ति तदा अन्ये विकल्पाः समुद्घटिताः भवन्ति ये अनुपयुक्ताः अपि भवितुं शक्यते। सहिष्णुतायाः भावमानेतुम् आदर्शसमाजस्य निर्माणार्थञ्च बालानां कृते स्वभाषायां चिन्तयितुं विचारयितुं पठितुं लेखितुं च अवसरान् प्रदद्युः। एतन्निष्कारणं नास्ति यत् प्रायः शतवर्षपूर्वं (१९०९ ईश्वीयतमे वर्षे) महात्मा गान्धी 'हिन्दस्वराजः' इति पुस्तकं स्वमातृभाषायां गुजरातीभाषायां लिखितवान् न तु आङ्ग्लभाषायाम्।

अस्माकं शिक्षाव्यवस्था केषाञ्चन जनानां भाषां स्वीकरोति, केषाञ्चन जनानां भाषां तिरस्करोति। एषा तिरस्कृतिः शिक्षां प्राप्तुं साधनस्य अथवा ज्ञानं प्राप्तये एकमात्रसाधनस्य नकारः वर्तते। अस्माभिः एतदपि ध्यातव्यं यत् नूतनानि यन्त्राणि निर्मातुं, नूतनानि शोधकार्याणि कर्तुं, स्वस्य विषये समाजस्य विषये च नूतनरीत्या चिन्तनं तदा एव सम्भविष्यति यदा वयं स्वभाषासु चिन्तयितुं शक्नुमः। एतच्च तदैव सम्भविष्यति यदा प्रत्येकं विद्यालयाः स्वस्य भाषाशिक्षायां नम्यतां विधास्यन्ति।

## बालानाम् अस्तित्वस्य प्रश्नः

द्वयोः तादृशोः विद्यालययोः कल्पनां करोतु ययोः स्वस्य भाषानीतिः स्यात् – एकः तादृशः विद्यालयः अस्ति यत्र बालाः विद्यालयम् आगच्छन्ति तत्र तेषां स्वस्य भाषा, जनजातीयभाषा भवेत् अथवा तस्य गृहस्य स्वकीया भाषा भवेत्, ताः पूर्णरूपेण सहजतया सम्मानेन सहैव कक्षायां स्वीक्रियते। बालाः स्वकीयभाषायां यत्किमपि वदेयुः, तन्निरर्थकम् भवतीति वक्तुं न शक्यते। नैव च तत् ग्राम्यम् 'गँवारू' इति उच्यते। स्वभाषायां सः स्वपितरं, पितामहं, कमपि अग्रजं वा 'त्वम्' इति कथयति। न केवलम् एतावदेव अपितु शिक्षकमपि 'त्वम्' इति वदति चेदपि तम् अपमानितं न क्रियते, तं 'ग्राम्यः' इति संबोध्य नोपवेश्यते। अयं विद्यालयः एतान् छात्रान् शनैः-शनैः बृहत्तरेण जगता ज्ञानेन च साकं योजयितुं क्षेत्रीयभाषां प्रत्यानेतुं प्रयतते। एतत् कार्यं तस्य स्वाभिमानं, आत्मविश्वासं च सम्पोषयन् शनैः-शनैः क्रियमाणम् अस्ति। अस्मिन् विद्यालये बालानां पूर्वार्जितस्य ज्ञानस्य स्वागतं भवति। अत्र बालाः मातृभाषातः प्रादेशिकभाषां प्रति सहजतया गच्छन्ति विचरन्ति च।

द्वितीयः तादृशः विद्यालयः वर्तते यत्र बालानां प्रवेशकालादेव तेषां शिक्षा वैदेशिकभाषायां आरभ्यते। तत्र यदि स्वकीयाभाषा मुखात् निःसरति तर्हि सः ग्राम्यः 'गंवार' इति उच्यते । अयं विद्यालयः बालानां स्वकीयां भाषां न स्वीकरोति।

दुमका-क्षेत्रे साक्षरताभियानस्य काले हिन्दीभाषायां (वयस्कानां कृते) पाठ्यपुस्तकानि विकसितानि। पुस्तकानि बहूनि उत्तमानि आसन् किन्तु तेभ्यः अवगमनं कर्तुं न शक्यते स्म। ततः स्थानीयजनानाम् साहाय्येन नूतना पठनसामग्री विकसिता सा अतीव लोकप्रिया अभवत्। एतानि पुस्तकानि संथालीभाषायां निर्मितानि आसन्। केचन जनाः अवदन् यत् प्रारम्भिकेषु चरणेषु एतदेव सम्यक् भविष्यति, परन्तु अनन्तरं कार्यस्य भाषायाः समावेशोऽपि आवश्यकः भविष्यति।

अस्य अनुभवस्योपयोगः विद्यालयीयशिक्षायामपि कर्तव्यः अर्थात् अवबोध-निर्माणार्थं तेषां स्वकीया भाषा, ततः शनैः-शनैः अधिकजनैः प्रयुज्यमाना भाषा सम्पर्कभाषा वा।

*– एकः प्रतिभागी*

यदि वयं एतयोः विद्यालययोः बालानां वृत्तान्तं गृह्णीमः तर्हि भवन्तः द्रक्ष्यन्ति यत् प्रथमविद्यालयात् ये बालाः बहिरागताः, ते आत्मविश्वासेन परिपूर्णाः सन्ति। स्वस्य मूलेन सम्बद्धानामेतेषां बालानां मनसि स्वभाषां प्रति किमपि वैरं हीनत्वं वा न भविष्यति। अस्य बालस्य प्रान्तीयभाषायां आङ्ग्लभाषायां च पर्याप्तः अधिकारः भविष्यति। परन्तु अन्यस्मात् विद्यालयात् बहिरागतानां बालानां स्वभाषायाः प्रत्याख्यानकारणात् तेषाम् आत्मविश्वासे न्यूनता भविष्यति तथा च अन्यभाषायाः महत्त्वकारणात् तेषां ध्यानं अभिव्यक्तेः स्थाने सम्यक् उच्चारणे व्याकरणे च भविष्यति। आगामिकाले सः विचारस्य स्थिरतायाः स्थाने भाषायाः संशोधने प्रवृत्तो भविष्यति।

बालाः आत्मानं परितः परिवेशं समग्रं जगच्च अवगच्छन्ति, तथा स्वस्य सम्पूर्णमस्तित्वम् आदाय विद्यालयम् आगच्छन्ति। यदि विद्यालये बालानां गृहभाषा निराकृता भवति तर्हि तदानीन्तनं यावत् यस्यां भाषायां बालानां विकासः अभवत्, सा निराकृता भवति। बालाः यस्यां भाषायां स्वस्य स्वरूपं निर्मितवन्तः, यया लोकस्य विषये अवबोधः निर्मितः, तस्याः निराकरणं न केवलं मातृभाषायाः निराकरणम् अस्ति, अपितु तस्य अवबोधस्याधारस्य निराकरणम् अस्ति। अतः अस्माभिः बालानां भाषा अवश्यमेव स्वीकरणीया। बालानां भाषायाः सीमाः अपि भविष्यन्ति, परन्तु अस्माभिः ताभिः सहैव स्वीकरणीयम्। प्रारम्भिककाले तेभ्यः स्वभाषायां पठितुं (बोधयितुं) अवसरः दातव्यः। शनैः-शनैः राज्यभाषायाः व्यापकज्ञानस्य व्याप्तेः भाषायाश्च सहैव योजनं करणीयम्। अस्मिन् प्रयासे स्वभाषायाः प्रभावः प्रान्तीयभाषासु भवितुं अनुमतिः दातव्या भविष्यति। एषः प्रयासः नूतनानां विषयाणां सार्थकरूपेण अवगमने सहायको भविष्यति तथा च पठनशिक्षणे आत्मनिर्भरतां आत्मविश्वासं च आनयिष्यति। बालाः यां भाषां प्रथमं वक्तुम् आरभन्ते, तस्यामेव तेषाम् अवगमनं निर्मितं भवति, तस्मादेव ते अर्थञ्च कुर्वन्ति। ते अर्थाः बालाकानां कृते कमर्थम् अभिधत्ते इति अस्माभिः अवगन्तव्यम्। एतदर्थम् अस्माभिः कक्षायां नूतना सज्जता कर्तव्या भविष्यति –

एतत् कियत् दुःखस्य विषयः यद् वयं स्वराजस्य विषये अपि वैदेशिकभाषायां वदामः? या शिक्षा आङ्ग्लैः तिरस्कृता अस्ति सा अस्माकम् आभूषणम् अभवत्, एतत् ज्ञातव्यम् अस्ति।.... ते यां विस्मृतवन्तः अज्ञानवशात् तयैव वयं संलग्नाः भवामः। तेषु स्वस्य स्वस्य भाषायाः उन्नतिकरणार्थं प्रयत्नः जायमानोऽस्ति। वेल्स-क्षेत्रम् इङ्ग्लैण्डदेशस्य एकं लघु परिषद् अस्ति; तस्य भाषा रजः इव तुच्छा अस्ति। एतादृश्याः भाषायाः पुनरुद्धारः जायमानो वर्तते।

वेल्सदेशस्य बालकाः वेल्सदेशस्य भाषायां वदेयुः, एतादृशः प्रयासः तत्र प्रचलति। अस्मिन् इङ्ग्लैण्डदेशस्य कोषाध्यक्षः लॉयड्-जार्जः महद्भागं गृह्णाति। अस्माकं स्थितिः कीदृशी अस्ति? वयं परस्परम् आङ्ग्लभाषायां पत्राणि लिखामः पत्राणां भाषा शुद्धा त्रुटिपूर्णा वा भवेत्.... अस्माकं उत्तमोत्तमविचारान् प्रकटयितुं एकः मार्गः अस्ति आङ्ग्लभाषा...। मम मन्तव्यं वर्तते यत् इत्थं दीर्घकालं यावत् भवेते चेत् भाव्यमानाः संततयः अस्माकं तिरस्कारं करिष्यन्ति तथा च अस्माकम् आत्मापि तेषां शापेन कुण्ठिता भविष्यति।....

अहं मन्ये यत् अस्माभिः अस्माकं सर्वाः भाषाः प्रोज्ज्वलाः तेजस्विन्यश्च कर्तव्याः। अस्माभिः स्वभाषायामेव शिक्षा ग्रहीतव्या- एतस्य किं तात्पर्यम् इत्यस्मिन् विषये अधिकं व्याख्यातुम् इदं स्थानं नास्ति। यानि आङ्ग्लभाषायां उपयोगीनि पुस्तकानि सन्ति तानि अस्माभिः स्वभाषायां अनूदितव्यानि भविष्यन्ति।

*– हिन्द-स्वराजतः*

- समयः, भाषा, अवबोधश्च परिवर्तमानाः सन्ति तथा च अस्माभिः एनां परिवर्तनप्रक्रियां मनसि निधायैव अर्थं ज्ञातुं अवसराः दातव्याः भविष्यन्ति।
- बालाः विश्वेषां भाषावबोधक्षमतां प्राप्य जन्म प्राप्नुवन्ति। कक्षायां तेषां क्षमतायाः सम्माननं कर्तव्यं भविष्यति।
- बालानाम् अवधारणायाः, तस्य/तस्याः अनुभूतेः, तस्य/तस्याः दर्शनस्य भाषायाश्च कृते निश्चयेन कक्षायां स्थानं दातव्यं भविष्यति।

- अस्माभिः तस्मै/तस्यै ध्वनिभिः सह क्रीडितुं अवसराः दातव्याः भविष्यन्ति।
- अस्माभिः तस्मै स्वस्य अर्थनिर्माणस्य अवसराः दातव्याः भविष्यन्ति।
- अध्यापकेन परिभाषां विना अवधारणायाः निकषा गन्तुं पद्धतिः परिकल्पनीया भविष्यति।
- पाठ्यसामग्रीणां सीमानः विस्तारणीयाः।
- अनुवादस्य यान्त्रिकतां सृजनात्मिका विधेया।
- सन्दर्भहीनां भाषां शिक्षयितुं प्रयत्नः त्याज्यः भवेत्। अर्थात् एषः भ्रमः अपाकरणीयः यत् क, ख, ग, घ अथवा ए, बी, सी, डी, एव भाषा अस्ति।
- भाषा बालानां अस्तित्वेन, संस्कृत्या, विकासेन च सह सम्बद्धा भवति ।
- भाषा तस्याः प्रगतेः माध्यमम् अस्ति।
- बालाः किमपि नूतनं वस्तु पश्यन्ति चेत् तं भाषया सह संयोज्य पश्यन्ति।
- भाषा अनुभवानां व्याख्यानस्य विश्लेषणस्य च आधारः अस्ति।
- ये बालाः वक्तुं न शक्नुवन्ति तेषाम् सविधे अपि एका भाषा भवति।
- शिक्षकैः एतदपि कर्तव्यं भविष्यति यत् संस्कृतभाषायां स्थानीयभाषायाः प्रवाहं स्वतन्त्ररूपेण आनेतुं अनुमतिः दातव्या। तस्य यत्किमपि पक्षं भवेत्। यथा- उच्चारणं भवेत्, वाक्यरचना स्यात् अथवा लोकोक्तिः स्यात्। अनेन हिन्दीभाषायाः स्थानीयसमुदायस्य च उभयोः कृते संवर्धनं प्राप्स्यते ।

## सार्थकशिक्षायाः प्रयासाः

अस्माकं शिक्षाव्यवस्था बालानामुपरि द्वितीयां भाषां प्रादेशिकभाषां वा आरोप्य 'मौनस्य संस्कृतिम्' समुत्पादितवती। बालानां सर्वाणि अवबोधद्वाराणि पिधानार्थं प्रयत्नं कृतवती। अनेकद्वीपानां समूहः एकः लघुदेशः अस्ति – 'पापुआ गिनी' । अयं देशः स्वभाषानीत्या एतत् सिद्धं कृतवान् यत् प्राथमिकशिक्षा चतुःशताधिकभाषासु दातुं शक्यते। अयं देशः भाषाम् अवगमनस्य वाहनं कर्तुं प्रयतितवान्। बालानां स्वभाषायाः उपयोगं कुर्वन् आङ्ग्लभाषया अन्यया भाषया वा साकम् एकीकरणस्य प्रयत्नं कृतवान्। अस्माभिरपि अस्मिन् क्षेत्रे प्रयत्नाः कर्तव्याः सन्ति। अस्माभिः प्राथमिकशिक्षायाः सन्दर्भे जापानम्, कोरिया, क्यूवा, फिनलैण्ड्, कनाडा इत्यादीनां देशानाम् भाषानीतिः अनुसरणीया। कोऽपि बालः स्वभाषायाः कारणेन पृष्ठं न गच्छेत्

इति कनाडादेशेन विशिष्टतया बोधितम्। अत्र शिक्षाधिकारे अधिनियमे मातृभाषायां शिक्षाविषये बलं प्रदत्तम् अस्ति। बालानाम् उत्तमशिक्षायै एतदपि आवश्यकं यत् तत्सार्थकं भवेत्। अस्माभिः एतदपि प्रयत्नः करणीयः यत् एषा शिक्षा बालकानां कृते तेषां क्षमतायाः विश्वासं दातुं शक्ता स्यात्। एतादृशी शिक्षा प्रथमभाषायां एव दातुं शक्यते। भाषावैज्ञानिकाः अपि प्रवदन्ति यत् प्रथमा भाषा समृद्धा भवति चेत् द्वितीयां भाषाम् अधिगन्तुं सरलता भवति। अधुना शिक्षायाः अधिकारस्य विधाने (आर.टी.ई.) मातृभाषया शिक्षाप्रदानस्य उपरि बलं प्रदत्तम्। बालानां कृते सैव शिक्षा श्रेष्ठतरा या सार्थिका भवति। अस्माभिः इदमपि प्रयतितव्यं यत् इयं शिक्षा बालान् तेषां क्षमतायाः विश्वासं प्रदद्यात्। इदृशी शिक्षा बालानां प्रथमाभाषया एव प्रदातुं शक्यते। भाषावैज्ञानिकाः कथयन्ति यत् यदा प्रथामाभाषा समृद्धा भवति तदा अपरायाः भाषायाः शिक्षणे सरलता भवति।

## ३

# बहुभाषिकता



- **बहुभाषिकतायाः उद्देश्यम्**
- **बालानाम् भाषाक्षमता**
- **सार्वभौमिकव्याकरणस्य परिकल्पना**
- **बहुभाषिकता, अल्पसंख्यकाः आदिवासिभाषाश्च**
- **बहुभाषिकता दक्षिणभारतीयभाषाश्च**
- **बहुभाषिकता आंग्लभाषायाः कक्षा च**
- **बहुभाषिक-कक्षा**
- **बहुभाषिकतायाः समाह्वानानि**

एकस्मिन् दिने एकस्मिन् ग्रामे बहुः कोलाहलः अभवत्। महान् खगोलशास्त्रज्ञाः आगताः। ते नक्षत्राणां विषये अतीव ज्ञातारः आसन्। दिनद्वयं सत्कारं कारयित्वा आकाशं प्रति पश्यन्तः आसन्। तृतीयेऽहनि ते कुत्रापि न दृष्टाः। जनाः अन्वेषणं कर्तुम् आरब्धवन्तः। यदा ते मिलितवन्तः, तदा एकस्मिन् कूपे निमज्जनं कुर्वन्तः आसन्। जनाः अवदन्– 'यो हि भूमौ गमनमार्गं न जानाति, सः आकाशस्य विषये किं ज्ञास्यति? बालानां स्वभाषायां शिक्षायाः सम्बन्धे अस्य आख्यानस्य बहुमहत्त्वं वर्तते। अस्माभिः बालानां स्वकीया आधारभूमिः सुदृढा कर्तव्या तथा चास्यां प्रक्रियायां सिद्धान्तानां विषये चर्चा कर्तव्या यान् सिद्धान्तान् शिक्षाजगति कार्यान्वयितुं समर्थाः भवेम। अस्मादपि स्पष्टं भवति यत् अस्माभिः आधारभूतशिक्षायाः मार्गाः अन्वेष्टव्याः सन्ति। बहुभाषिकता तादृश एव एकः उपायो वर्तते।

## बहुभाषिकतायाः उद्देश्यम्

बहुभाषिकता अस्माकं जीवनस्य अत्यावश्यकः भागोऽस्ति। अस्माकं संस्कृतिः अस्माकं अस्तित्वेन सह सम्बद्धा वर्तते। वयं सर्वे बहुभाषिणः स्मः। अस्माकं

बहुभाषिकत्वम् अन्यैः सह सम्पर्कं कर्तुम् अवगन्तुं च साहाय्यं करोति। अधुना जनाः एकस्मात् देशात् अन्यस्मिन् देशं गच्छन्ति, ते तत्रत्ये आर्थिक-सामाजिकजीवनेऽपि स्वस्य प्रभुत्वं स्थापयन्ति। अतः इदानीन्तनकाले एकं राष्ट्रम्, एका भाषा, एका संस्कृतिः इत्यस्याः अवधारणायाः स्थानमेव नास्ति। एतच्चिन्तनं न केवलं निरर्थकं स्यात् अपितु समग्रस्य जगतः ज्ञानात् नेत्रयोः निमीलनमिव।

वयं बहुभाषिकतायाः महत्त्वम् अवगच्छामः अवगत्य चास्याः बहुप्रयोगमपि कुर्मः। न कश्चिदेतत् निराकर्तुं शक्नोति यत् बहुभाषिकतायाः प्रयोगं बालजीवनसम्बद्धमपि अस्ति। तर्हि बालकाः किमर्थं तस्मात् दूरीकृताः भवन्ति? बालान् अवगन्तुम्, तैः सह सम्बन्धनिर्माणाय, विद्यालयेन सह योजनाय, तेषां गृहभाषायाः विद्यालयभाषायाः च मध्ये सेतुनिर्माणाय बहुभाषिकतायाः महती भूमिका भवति।

बालकाः स्वमातृभाषां जानन्ति। आत्मानं परितः वातावरणे तस्याः व्यवहारे उपयोगमपि पश्यन्ति। अधुना आवश्यकता अस्ति यत् स्वभाषायाः सुदृढं आधारं दत्त्वा स्वभाषायाः अन्यभाषयोः मध्ये सेतुनिर्माणं करणीयम्। एवं प्रकारेण इतोऽपि द्वयोः त्रिषु वा भाषासु तं तां च प्रापयेत् येन सः सुलभतया शिक्षां प्राप्तुं शक्नुयात्। मातृभाषायाः प्रयोगः व्यवहारे मेरुदण्डवत् भवितव्यः। वयं एकवारमेव पठितुं लेखितुं च शिक्षयेम। मातृभाषायां यदि एतत् कौशलं नियतं भवति तर्हि अन्यभाषासु लेखनं पठनं च अतीव सुलभं भवति।

## बालानां भाषाक्षमता

अधिसंख्यकाः बालाः विद्यालयम् आगमनात् पूर्वमेव न केवलमेकां भाषाम् अपितु प्रायः अधिकाः भाषाः अधिगच्छन्ति। विद्यालयम् आगमनात्पूर्वं बालाः प्रायः पञ्चसहस्राणि ततोऽधिकान् वा शब्दान् जानन्ति। अतः बहुभाषिकता अस्माकं परिचयस्य अस्तित्वस्य वा निर्धारिका अस्ति। न केवलमेतावदेव अपितु दूरस्थग्रामाणामपि तथाकथितः 'एकभाषाभाषी' अपि बहुषु संप्रेषणात्मकपरिस्थितिषु भाषायाः सम्यक् प्रयोगस्य क्षमतां धारयति। अनेकैः अध्ययनैः परिज्ञातं यत् बहुभाषावादस्य संज्ञानात्मकविकासेन, सामाजिकसहिष्णुतया, विकेन्द्रीकृतचिन्तनेन, शैक्षिकोपलब्ध्या च सकारात्मकरूपेण सम्बन्धः अस्ति।

भाषावैज्ञानिकदृष्ट्या सर्वाः भाषाः याः वयं 'बोली', 'आदिवासी' अथवा

सर्वे बालाः चतुर्वर्षवयसि एव अनेकाः भाषाः अधिगन्तुं क्षमतां धारयन्ति।

× × ×

भारतस्य संविधानस्य अनुच्छेदः २९ प्रतिपादयति– 'स्वस्य भाषायाः संस्कृतेः च रक्षणस्य अधिकारः अस्ति'। अनुच्छेदः ३०, ३५०ए चापि अस्मिन् एव सन्दर्भे स्व-स्वभाषायाः रक्षणस्य, संरक्षणस्य, सुलभतायाश्च विषये वदति।

मिश्रितभाषाः इत्याख्यया कथयामः, ताः सर्वाः समानरूपेण वैज्ञानिकीभाषाः सन्ति। भाषाः परस्परं मिथः सानिध्येन प्रफुल्लिताः संवर्धिताश्च भवन्ति, सहैव स्वस्य विशिष्टं परिचयमपि स्थापयन्ति। बहुभाषिककक्षायाम् एतत् सर्वथा अनिवार्यम् भवेत्। यत् प्रत्येकं बालानां भाषायाः सम्माननं भवेत्, तथा च बालानां भाषावैविध्यं शिक्षणपद्धतीनां भागं स्वीकृत्य भाषाः शिक्षणीयाः।

## सार्वभौमिक-व्याकरणस्य अवधारणा

भाषाशिक्षणस्य सन्दर्भे भाषाविदः अपि एतदेव वदन्ति। प्रत्येकं भाषायां स्वराः,व्यञ्जनानि च भवन्ति। प्रत्येकं भाषायाः स्वकीयं वैशिष्ट्यं भवति, नैव च ताः परस्परं समानं भवितुम् अर्हन्ति। ताः स्वतः 'अद्वितीयाः' सन्ति। उदाहरणरूपेण "अहं स्वस्य अभिप्रायं वक्तुं प्रयतमानोऽस्मि" 'प्रयासं करोमि', 'भवान् खादितुं यत्नं करोतु' 'प्रयासं कृत्वा पश्यतु'। इत्यादिषु उदाहरणेषु सर्वत्र प्रयासपदस्य संदर्भः परिवर्तितो भवति।

एभिरुदाहरणैः स्पष्टं भवति यत् पर्यायपदानि सर्वदा समानार्थं न यच्छन्ति। यः व्यक्तिः द्वे द्व्यधिकाः वा भाषाः जानाति तस्य सविधे एकस्याः भाषाव्यवस्थायाः द्वौ भागौ भवतः तथा च पृथक्-पृथक् भाषायाः पृथक्-पृथक् 'व्यवस्था' अपि अस्ति। ''बालः कूपीं भग्नवान्''। एतत् उर्दू-, पंजाबी-, हिन्दीभाषा इत्येतेषु कस्याः भाषाव्यवस्थायाः वाक्यमस्ति ? तिसृणामपि वाक्यं भवितुम् अर्हति। ''मुंडे नाल मैं नी जा सकदी।" (बालकेन सह अहं गन्तुं न शक्नोमि।) पञ्जाबीभाषायां 'मुण्डे' इत्यनेन सह 'दे' इति योजयितुं आवश्यकता नास्ति। एताषां सर्वाषां भाषाणां स्वकीयाः व्यवस्थाः

सन्ति। बालाः स्वयमेव स्वपरिसरस्य भाषितभाषायाः ध्वनिं, वाक्यविन्यासं, शब्दान् च जानन्ति। द्वयोः भाषायोः मध्यस्थं भेदमपि अवगच्छन्ति, भाषाणां संरचनात्मिकां रचनाम् अपि जानन्ति। यथा - मैसूरुनगरस्य कश्चन व्यक्तिः कङ्कतम् (कङ्घी) इत्यस्य कृते 'काङ्घी' इति वदिष्यति। यदि वयं भाषाणां व्यवस्थां ज्ञास्यामः तर्हि शिक्षणस्य कठिनताः सुलभतया अवगन्तुं शक्नुमः। यस्य सविधे द्वे द्व्यधिकाः वा भाषाः सन्ति तस्य सविधे एकं शरीरं द्वौ आत्मानौ स्तः। एतत् 'विकासस्य' एव भागः अस्ति एतद् महत्त्वपूर्णं तथ्यम् अवधेयमस्ति यत् यदि भाषा तिरोहिता भवति तर्हि तया सह संस्कृतिः अपि विलुप्ता भविष्यति। अफ्रीकायाम् भाषाविलुप्ततायाः कारणात् एका संस्कृतिः विलुप्तप्राया आसीत्, परन्तु जनाः यथाकालं सचेताः अभवन्।

> नागालैण्डे यद्यपि आङ्ग्लभाषां सर्वकारीय- कार्यस्य भाषा कृता अस्ति तथापि आवश्यकतानुसारं सप्तदश (१७) आदिवासीभाषाः अपि प्राथमिकस्तरस्य (शिक्षायाम्) स्वीकृताः सन्ति। एका भाषा तु स्नातकोत्तरं (एम.ए.) यावत् पाठ्यते। सर्वशिक्षाभियानेन सततं प्रयत्नः क्रियमाणो वर्तते यत् बालाः स्वभाषायामेव पाठयेयुः।

## बहुभाषिकता अल्पसंख्यकाः आदिवासीभाषाश्च

याः भाषाः अल्पैः जनैः भाष्यते, सामान्यतः तेषां बालाः विद्यालयेषु आगन्तुं न प्रभवन्ति। बहुभाषावादस्य सम्माननं कृत्वा वयं तान् सर्वान् बालान् शिक्षायाः परिधिमध्ये आनेतुं शक्नुमः। बहुभाषावादस्य सन्दर्भे भाषाविषयकानामल्पसंख्यकानाम् अधिकारः अस्ति यत् ते/ताः स्वभाषायां प्राथमिकशिक्षां प्राप्नुयुः। भाषासंरक्षणार्थम् एका संस्थापि निर्मिता भवेत्। एकस्य अल्पसंख्यकभाषायोगस्य गठनं कृतम् अस्ति, यस्यानुसारम् अद्यापि एतादृशी स्थितिः अस्ति यत् काश्चन तादृश्यः भाषाः सन्ति याः अल्पसंख्यकाः न सन्ति तथापि शिक्षाक्षेत्राद् बहिः सन्ति।

अनुसन्धानानि प्रवदन्ति यत् आदिवासिबालान् अग्रे आनेतुमेव बहुभाषावादस्य चर्चा अभवत्। आदिवासिबालाः यदा विद्यालयम् आगच्छन्ति तदा तेभ्यः नूतना भाषा प्राप्यते, सा असमिया अन्या वा भाषा भवेत्। ते मुख्यधारायां संयुक्ताः भवेयुः

इत्युद्दिश्य विद्यालयम् आनीयन्ते, यद्यपि तेषां भाषा 'चेन्जु' अन्या वा स्यात्। परिणामः एषः भवति यत् यस्यां भाषायां तेषां स्वस्य सांस्कृतिकबोधः आसीत् तस्याः भाषायाः ते दूरं गच्छन्ति।

## बहुभाषिकता दक्षिणभारतीयभाषाश्च

इत्यपि विश्वासः अस्ति यत् दक्षिणभारते अवगमनार्थं स्वकीया भाषा तमिल-कन्नड-तेलुगु-मलयालम-आंग्लभाषाश्च पर्याप्ताः सन्ति। त्रिभाषासूत्रानुसारेण तेषां कृते तृतीयभाषारूपेण हिन्दीभाषायाः अध्ययनं भारः भवितुं शक्यते। सर्वेषु राज्येषु स्वकीया आधिकारिकराजभाषा अस्ति। बालानां स्वकीयाः अन्याः भाषाश्च सन्ति। तथा च तृतीया भाषा आङ्ग्लभाषा अपि अस्ति। इदानीं प्रश्नः उत्पद्येत यत् एतावता भाषाः सन्ति चेदपि प्राथमिकशिक्षा केवलं मातृभाषायां किमर्थम् ?

अस्मिन् सन्दर्भे ध्यातव्यं यत् बहवः बालाः पञ्चमकक्षानन्तरं पठनं लेखनञ्च त्यजन्ति। ते मातृभाषां पूर्वतः एव जानन्ति। अतः यदि पञ्चमखककक्ष्यापर्यन्तं शिक्षणं तेषां मातृभाषायां भविष्यति तर्हि अध्ययनं सुलभं भविष्यति, अन्यथा पञ्च वर्षाणि अन्यभाषाशिक्षणप्रक्रियां ज्ञातुमेव व्यतीतानि भविष्यन्ति तथा च ते किमपि 'सार्थकम्' कर्तुं न शक्ष्यति। त्रिभाषासूत्राणि बहुभाषिकावधारणा नास्ति। नैव च काचित् नीतिः। एतदेकः कार्यक्रमः इति वक्तुं शक्यते। अस्मिन् भाषाणां वैविध्यं द्रष्टुं पुनः आवश्यकता भविष्यति। एतद्-बहुभाषिकतायाः माध्यमेनैव कर्तुं शक्यते।

## बहुभाषिकता आङ्ग्लभाषायाः कक्षा च –

आङ्ग्लभाषाशिक्षणस्य उद्देश्यं तादृशानां बहुभाषाभाषिणां निर्माणम् अस्ति। ये अस्माकं सर्वासां भाषाणां समृद्धिं कर्तुं शक्नुयुः। एतदेव स्वीकृतं राष्ट्रियं च मन्तव्यम् अस्ति। एतदर्थम् आङ्ग्लभाषा यस्यां कस्यामपि कक्षायाम् (I-III वा IV वा V/VI) आरभ्यते, तत्सार्थकपरिस्थितौ शिक्षणीयम्। परन्तु सामान्यतया आङ्ग्लकक्षायां मातृभाषायाः प्रवेशः गुप्तप्रवेशकरूपेण भवति। उत्तरं लेखयन् शिक्षकः पाठेन सहैव अनुवादं व्याख्यानं च एकत्रैव करोति। अवबोधस्य निर्माणक्रमे बालानां मातृभाषायाः प्रचुरतया प्रयोगं कृत्वा अथवा आङ्ग्लभाषया सह सम्बन्धं कृत्वा योग्यं स्थानं दातुं शक्यते। प्रभुः (१९८७) अस्य एकमुदाहरणं यच्छति – "बेङ्गलूरुः

(बंगलौर-) परियोजनायां मातृभाषायाः प्रयोगस्य सीमा कार्यस्य आवश्यकताभिः स्वाभाविकतया निर्धारिता आसीत्। तत्र सामग्र्यः आङ्ग्लभाषायां आसन् उत्तराणि अपि आङ्ग्लभाषायामेव आगच्छन्ति स्म। आवश्यकतायां सति मातृभाषा एव आङ्ग्लभाषाम् अवबोधगम्यं कृतवती। यदि आङ्ग्लभाषायां विविधाः सामग्र्यः उपलब्धाः सन्ति, तथा च तदवगन्तुं वास्तविकः प्रयासः भवति तर्हि मातृभाषा आक्षेपकारिका न भवति, अपितु सहायिका एव भवति"। क्रेशनः (१९८५–९४) वदति यत् "समानकाले कृतः अनुवादः प्रभावी न भवति" कक्षायां प्रथमभाषां पृष्ठभूमौ संप्रयुज्य लक्ष्यभाषायाः सामग्रीः बोधगम्यां कर्तुं द्वयोः भाषयोः उपयोगः क्रियते।

आङ्ग्लभाषाशिक्षणस्य सामग्रीनिर्माणार्थं मातृभाषायाः उपर्युक्तप्रयोगानाम् अवबोधनिर्माणे शिक्षकाणां सहभागिता सुनिश्चिता भवतु इति आवश्यकता वर्तते। भाषाशिक्षणस्य उपर्युक्ताः स्तराः के भवितुमर्हन्ति? इत्यस्मिन् विषये अध्यापकानां कृते मानसिकसम्बोधनस्य आवश्यकता वर्तते।

**काश्चन सम्भावनाः –**

- प्राथमिकविद्यालयेषु भाषाणां मध्ये 'भाषाणां' 'विषयाणां' च मध्ये बाधाः दूरीकर्तुं प्रयत्नाः करणीयाः सन्ति। निम्नप्राथमिकस्तरे अथवा न्यूनातिन्यूनं प्रथमतः तृतीयपर्यन्तं कक्षासु याः गतिविधयः बालानां कृते आत्मानं परितः जगतः विषये अवबोधं कर्तुं प्रदीयते ताः आङ्ग्लभाषया सह मातृभाषासु अपि दातुं शक्यन्ते (दासः२००५)। एतादृशानां बहुभाषिकक्रियाणां विकासाय शिक्षकानां सहयोगेन स्पष्टपद्धत्या सामग्रीमार्गदर्शिकानां निर्माणस्य आवश्यकता वर्तते। अस्याम् एकाधिकभाषायाः उदाहरणानि समाविष्टानि भवेयुः। तासु कूट-परिवर्तनस्य उदारता अपि भवितुमर्हति।
- एकाधिकभाषासु समानान्तरपाठानां प्रायोजनं समाना कथा भवितुं शक्यते। यथा- एन.बी.टी-संस्थया आंग्लभाषया सहैव भारतीयभाषास्वपि कथाः प्रकाशिताः। (पश्यन्तु- अमृतवल्ली एवं रामेश्वररावः, २००१)। प्रोमिस्-फाउण्डेशनसंस्थया चतुर्षु भारतीयभाषासु आङ्ग्लभाषासु च महत्पुस्तकानि निर्मितानि। सीआईईएफएल-इत्यस्य सम्पूर्णभाषादृष्ट्या द्विभाषायुतानि

पुस्तकानि निर्मितानि। एतादृशाः समानान्तरपाठाः परस्परं यथावत् अनुवादाः भवेयुः, एततदावश्यकं नास्ति, परन्तु ते समानार्थकाः समानाः भाषाक्रियाश्च भवेयुः। यथा- छन्दः, ध्वनिक्रीडा इत्यादीनां समावेशः स्यात्, येन बालाः भाषायाः ध्वनिं संरचनां प्रति सचेताः भवेयुः। पठनम् एकं संचरणीयं कौशलम् अस्ति। एकस्यां भाषायां पठनकौशलम् अन्यभाषायाः ज्ञाने साहाय्यं करोति (वेस्ट्– १९४१)। एतत् न केवलं समानलिपियुक्तासु भाषासु कार्यं करोति, अपितु भिन्नलिपियुक्तासु भाषास्वपि कार्यं करोति । (वेस्ट् इत्यनेन बङ्गलाभाषायां आङ्ग्लभाषायां च कार्यं कृतम् अस्तिः, लिपिद्वयस्य स्थितेः पठनस्य संचरणीयतायाश्च विषये अधुना किञ्चित् परिज्ञायते)।

- उपर्युक्ताः परामर्शाः न केवलं समानान्तरभाषाणां विषये सन्ति अपितु सहैव च कार्यं कुर्वतीनां भाषाणां विषये अपि सन्ति, तत्रैव द्विभाषाभ्याम् अध्ययनाध्यापनकुर्वतां कृते अथवा मिश्रितकूटस्य द्विभाषीपाठेष्वपि प्रयोगात्मककार्याणि समुपलब्धानि सन्ति (पश्यन्तु- डोवेरा २००५, फेलिक्स् १९९८) एतेषां शैक्षणिकसंभावनानाम् अन्वेषणं कर्तुं शक्यते।

*– अंग्रेजीशिक्षणम् – आधारपत्रम्, पृष्ठम् १३-१४*

## बहुभाषिककक्षा –

का अपि भाषा कथं पाठ्यते? एतदर्थम् अस्माभिः प्रथमं लेखनविज्ञानं अवगन्तव्यम्। अत्र मनः हस्तयोः च संयोगः/ समन्वयः आवश्यकः। ५-६ वर्षाणि यावत् एषः विकासः दृढं न भवति । एतदर्थं लेखने काठिन्यं भवति। परन्तु शोधैः इदमपि ज्ञायते यत् बालानां मनसि मुद्रणस्य अवधारणा अथवा अवबोधनिर्मातुं पठनेन सह लेखनस्यापि आरम्भः कारणीयः। एतल्लेखनं रेखयापि भवितुं शक्नोति। एतदपि अवगमनं महत्त्वपूर्णम् अस्ति यत् श्रवणं वक्तुं च अतीव महत्त्वपूर्णम् अस्ति। गणितशिक्षणस्य विषये वदामः

> यूनेस्को - संस्थायाः शैक्षणिक आधारपत्रस्य (२००३) अनुसारं प्रारम्भिकशिक्षणस्य कृते मातृभाषा अत्यावश्यकी अस्ति, यथासम्भवं चैतस्याः प्रयोगः अग्रिमकक्षायामपि करणीयः। कानिचन अध्ययनानि

चेत् बालाः पूर्वमेव गणितं जानन्ति। चाकलेह्यस्य (टॉफी इत्यस्य) वितरणं शिक्षणं विनैव अवगच्छन्ति। तथैव जलस्य कठिनं (ठोस), द्रवः, वाष्पश्चेति त्रीणि रूपाणि मातृभाषायाः साहाय्येन अधिकस्पष्टतया अवबोद्धुं शक्यन्ते- परन्तु बालानां मनसि यदा अवधारणा स्पष्टा भवति ततः परं मातृभाषायाः माध्यमेनापि पारिभाषिकशब्दानां आदान-प्रदानं कर्तुं शक्यते। द्वितीया तृतीया च भाषा योज्यते चेदपि मातृभाषायाः प्रयोगः निरन्तरं भवेत्। ते मातृभाषायाः माध्यमेन अधिकाः भाषाः अवगन्तुं आरभन्ते। अस्माभिः केवलं शिक्षानद्याः उपरि उत्तमं दृढं सेतुनिर्माणं कर्तव्यम्।

> (यथा- सहगल-१९८३) प्रतिपादयन्ति यद् ये बालकाः मातृभाषायाः माध्यमेन शिक्षां प्राप्नुवन्ति ते आङ्ग्लभाषामाध्यमेन अध्ययनरतां समानस्तरस्य छात्राणां अपेक्षया भाषिकस्तरे ज्ञानस्तरे च कुत्रापि न्यूनाः न भवन्ति। १५-१७ वर्षीयाणां ७८ बालकानामुपरि कृतस्य शोधस्य अनन्तरं गुप्ता (१९९५) कथयति यत् प्रारम्भिकावस्थायां वर्षद्वयं यावत् मातृभाषायाः माध्यमरूपेण प्रयोगः, बालकेषु मातृभाषायां द्वितीयभाषायां च उत्तमां प्रवीणतां जनयति।
>
> *- भारतीय भाषाओं का शिक्षण, राष्ट्रीय फोकस समूह का आधारपत्रम्-१.३ पृष्ठम्-१५*

ध्यातव्यांशः अयमपि वर्तते वयं तदेव शृणुमः अवगच्छामश्च यत् पूर्वतः न जानीमः। अन्यत् सर्वं तुच्छम् अनुभूयते, तत् वयं बहिः त्यजामः। आवश्यकतानुसारमेव कर्मकराः बिहारप्रदेशतः असमप्रदेशं, पंजाबराज्यम् इत्यादिषु स्थानेषु गत्वा तत्रत्यां भाषाम् अधिगच्छन्ति।

## बहुभाषिकतायाः समाह्वानानि-

- सर्वप्रथममिदं ध्यातव्यं यत् भाषारूपेण भाषायाः शिक्षणं भिन्नः विषयः वर्तते माध्यमरूपेण च भिन्नः विषयः। भाषायाः शिक्षणं न केवलं भाषाशिक्षकस्य कार्यम् अस्ति। अन्यविषयाणाम् अध्ययनाध्यापनं भाषातत्त्वानि विना न सम्भवति। विज्ञानेऽपि क्रियाः, संज्ञाः एवञ्च सर्वनामपदानि भवन्ति। हिन्दीभाषा अथवा अन्या काचित् भाषिकसंरचना विज्ञानस्य अवधारणा च सहैव संगच्छेत्।

- बहुभाषिकतायां द्वितीया समस्या लिपेः भवति। उदाहरणरूपेण – जेमी (असम-नागालैण्ड-देशयोः) रोमनलिपिं चिनोति । तर्हि अस्यां प्रक्रियायां ते बालाः ए-वर्णतः जेड-वर्णपर्यन्तं शिक्षयिष्यन्ति परन्तु 'जेमी' इति भाषायां एतानि सर्वाणि अक्षराणि न प्रयुज्यन्ते।
- तृतीया समस्या एषा अस्ति यत् विद्यालयेषु पठनलेखनयोः विषये बहु बलं दीयते – भाषणकौशलस्य श्रवणकौशलस्य च विकासे अवधानं न दीयते।
- शिक्षणाधिगमसामग्रीणाम् उपयोगः अपि एका समस्या अस्ति। तन्न तु सुरुचिपूर्णं भवति नैव च संस्कृतिसङ्गतम् । ओडिसा-प्रदेशस्य जनजातीनां मध्ये जन्मदिनोपलक्ष्ये उपहारप्रदानस्य प्रथा नास्ति, परन्तु एतादृशानि उदाहरणानि समाविष्टानि कारयन्ति।
- एका अपरा समस्या भाषाशिक्षकाणां नियुक्तिविषये अस्ति। भाषाशिक्षकाणां नियुक्तिः एव न भवति। कस्मैऽपि जनाय कस्यचित् विषयस्य आचार्याय वा एतत् कार्यं प्रदीयते। ते वदन्ति भाषा एव शिक्षणीया खलु एतत्तु कोऽपि कर्तुं शक्नोति।
- कस्मिन् अपि स्तरे समुदायं संयोजयितुं कोऽपि उपक्रमः न क्रियते, प्राथमिकस्तरे मातृभाषायाः स्थानम् अत्यावश्यकम्। पश्चात् अधिकाः भाषाः योजयितुं शक्यन्ते। विघ्नाः भविष्यन्ति किन्तु तेषां समाधानमपि अन्वेषयितुं शक्यते।

> अद्यतनकक्षासु आङ्ग्लभाषायाम् अध्ययनं दृष्ट्वा कदाचित् चिन्तनम् आगच्छति यत् पूर्वं जनाः हीरकादीनि रत्नानि च लुण्ठन्ति स्म। अधुना भाषायाः माध्यमेन हृदयं मनः च लुण्ठन्ति।
>
> *– एकः प्रतिभागी*

- यदा वयं कक्षायां पाठयाम तदा एकस्याः भाषायाः अन्यभाषया सह सम्बद्धं कुर्मः, यदि केवलं एकया भाषया शिक्षणं करवाम तर्हि कक्षायां वार्तालापः एव भवितुं नार्हति। परन्तु खेदस्य विषयोऽयं वर्तते यत् यथा कृषिक्षेत्राणि, कोष्ठानि, पत्राणि इत्यादीनि विलुप्तानि भवन्ति, तथैव बहवः शब्दाः अपि विलुप्ताः भवन्ति। यथा – "पुआल का टाल, मेह, गौन्, डाल्,ऐंच्, उरैव, भूजब" इत्यादयः शब्दाः हिन्दीभाषायां सम्प्रति प्रयोगे न सन्ति।

साहित्यकारैरपि अवध्यातव्यं यत् बहुभाषिकतायाः प्रभावादेव वयम् अधिकाः भाषाः ज्ञातुं शक्नुमः। कबीरः बहुभाषिकः सन्तकविः आसीत्। सः जनान् अवबोधयितुं 'सधुक्कड़ी'भाषां स्वीकृतवान्। हबीबतनवीरस्य 'आगरा बाजार' इति, भिखारीठक्कुरस्य बहुप्रियं नाटकम् 'बिदेसिया' इत्यादयः बहुभाषिकतायाः वैशिष्ट्यानि द्योतयन्ति।

अस्माकं देशः बहुभाषिकः अस्ति। एतदर्थम् अनेकासां भाषाणां ज्ञानं न केवलं अस्मान् परस्परं संयोजयिष्यति, अपितु भाषाः अपि परस्परं संयोजयिष्यन्ति। भाषा विचाराणां चक्रं वर्तते द्विभाषिकत्वं च मानवस्वभावः। वयम् एकम् एतादृशं समाजं निर्मातुम् इच्छामः यः बहुभाषां वदेत् परन्तु स्वस्यां भाषायाम्। तथा च सर्वेषां मनसि एतदेव भवेत् यदेषा वार्ता अन्ततः तेषां विषये एव अस्ति।

जार्ज स्टाइनरः स्वस्य पुस्तके 'द मॉडर्न वर्स इन ट्रांसलेशन' इति पुस्तकं स्वमातरं समर्प्य लिखितवान् आसीत्- 'टु माई मदर हू स्पीक्स सैवरल लैंग्वेजिज़ बट इन हर ऑन टंग' (मात्रे, या बहुभाषां वदति किन्तु स्वभाषायाम्)

बर्लित्ज् भाषाविद्यालयः... कृत्वा अधिगन्तारेभ्यः संसाधनानाम् उत्तमम् उदाहरणम् अस्ति। एते विद्यालयाः नियमानि विरच्य एकभाषा भाषणस्य पठनस्य च बाध्यतां नोत्पादयन्ति। ते एतदपि न वदन्ति यत् अन्यभाषाशिक्षणेन अस्माकं कृते उत्तमं व्यवसायं भविष्यति अथवा वयं सफलाः समृद्धाः च भविष्यामः इति, न चैतद् वदन्ति यद् अनधिगते सति वयं असफलाः निर्धनाश्च भविष्यामः। ते नैतादृशां प्रतिज्ञां कुर्वन्ति नैव च तर्जनं कुर्वन्ति। ते केवलमिदमेव वदन्ति यत् यदि वयं अन्यभाषां वक्तुं शक्नुमः तर्हि जीवनस्य आनन्दं प्राप्तुं शक्नुमः।

*– शिक्षा की बजाय, जॉन् होल्ट्एः*

## सहैव गता बो-भाषा, संकटः अग्रेऽपि



अण्डमानस्य पञ्चाशीति-(८५) वर्षीयायाः बोआ ज्येष्ठायाः निधनेन सहैव 'बो'इत्याख्यां प्राचीनभाषाम् अग्रे नेतुं या शृंखला आसीत् सा शृंखला पूर्णतः नष्टा अभवत्। एनां घटनां भाषाविज्ञानक्षेत्रे अपूरणीया क्षतिः इत्युच्यते। यतो हि सा विश्वस्य प्राचीनतमासु भाषासु एकां भाषां वदन्ती अन्तिमा महिला आसीत्। एतदपि उल्लेखनीयं यदण्डमानस्य प्राचीनानां भाषाणां स्रोतः अफ्रीकादेश इति मन्यते। अनेकाः अण्डमानीयाः भाषाः (७०) सप्ततिसहस्रवर्षादपि पुरातनाः मन्यन्ते। प्रमुखभाषाविद् प्रो. अन्विता अब्बी कथयति यत् स्वमातापितरौ मृत्योः अनन्तरं बोआ अन्तिमा महिला आसीत् यः विगत ३०-४० वर्षेभ्यः 'बो'भाषां वदति स्म। बोआ प्रायः अतीव एकान्ततां अनुभवति स्म। अन्यैः जनैः सह संवादं स्थापयितुं तस्याः कृते अण्डमानीहिन्दीभाषायाः शिक्षणम् अनिवार्यम् जातम्।

यतो हि अण्डमानीभाषाः पाषाणयुगीनभाषायाः अन्तिमावशेषाः मन्यन्ते, एतदर्थं वक्तुं शक्यते यत् 'बोआ'वरिष्ठायाः मृत्युना सहैव भाषासमूहस्य एका अन्यतमा भाषा पूर्णतः विलुप्ता। अण्डमानस्य जनजातयः चतुर्णां समूहेषु वर्गीकृताः सन्ति- महान् अण्डमानी, जरवा, ओन्गी, सन्टीनली च। 'बोआ' वरिष्ठा महान् अण्डमानी समूहस्य आसीत्। अधुना अस्याः जनजातेः प्रायः पञ्चाशत् (५०) जनाः एव अवशिष्टाः सन्ति, तेष्वपि अधिकांशेन बालकाः सन्ति।

*– आधारः बी.बी.सी. समाचारः*



# ४
# विषयाणां केन्द्रे भाषा

- **इतिहासस्य वातायनेन**
- **सर्वेषां विषयाणामध्यापकाः भाषाध्यापकाः**
- **चिन्तस्य स्वातन्त्र्यम् मौलिकतायाः प्रश्नश्च**
- **भाषा अन्ये विषयाश्च**
- **प्राविधिक-शब्दावली बालानां बोधश्च**
- **उच्चशिक्षा अन्यविषयाश्च**

भाषा उपकरणवद् वर्तते यस्योपयोगः वयं जीवनं अवबोद्धुं, तेन सह सम्बद्धतायै, जीवनजगतः प्रस्तुत्यर्थञ्च कुर्मः।

भाषा न केवलं संप्रेषणसाधनम्, अपितु सा एकः तादृशः माध्यमः अपि अस्ति यस्य साहाय्येन वयं अधिसंख्यकां सूचनां प्राप्नुमः। इयम् एका व्यवस्था अस्ति या अस्मान् परितः जायमानां यथार्थतां घटनां च बहुधा अस्माकं मस्तिष्के व्यवस्थितां करोति। एषा बहुधा प्रकारैः अस्माकं परिचायकचिह्नम् अस्ति तथा च अन्ततः समाजेन सह, सत्तया, शक्त्या च अत्यन्तं निकटतया सम्बद्धमस्ति। अस्माभिः एतदपि स्मर्तव्यं यत् वयं भाषायाः उपयोगं न केवलं अन्यैः सह वार्तालापार्थं कुर्मः, अपितु स्वेनापि वार्तालापार्थम् भाषायाः प्रयोगं कुर्मः । एतत् खलु भाषायाः महत्त्वपूर्णं कार्यम् अस्ति। वयं कथं स्वविचारान् अभिव्यक्तीकर्तुं शक्नुमः यावत् प्रथमम् आत्मना सहैव वार्तालापं कर्तुं नावगच्छेम।

भिन्नविषयक्षेत्राणि यथा – इतिहासः, भौतिकविज्ञानम् अथवा गणितम् इत्यादिभिरपि वक्तुम् अधिगन्तुं च अस्माकं कृते भाषायाः आवश्यकता भवति। वयं प्रकृतिं समाजं वा पश्यामः चेत्, बहुधा तान् स्वस्याः भाषायाः संरचनायाः माध्यमेनैव पश्यामः।

निर्धनवर्गस्य ये बालाः आङ्ग्लभाषामाध्यमविद्यालयेषु प्रवेशं प्राप्नुवन्ति तेषां

सर्वेषां कथा प्रायः समाना एव अस्ति। ते भाषया सह सामञ्जस्यं स्थापयितुं न शक्नुवन्ति तथा च ते क्रमेण सीमान्तं प्रति गच्छन्ति। विद्यालये प्रवेशार्थं सर्वकारस्य विविधाः योजनाः सन्ति। न जाने शिक्षणव्यवस्थायां किमर्थम् एतादृशं चिन्तनं नागतं यद् भाषायाः अयं भेदः सर्वथा अमङ्गलकारी एवास्ति।

एकस्य बालस्य अभिभावकाः इच्छन्ति स्म यत् तेषां बालकः आङ्ग्लभाषामाध्यमेन विद्यालयस्य शिक्षां गृह्णीयात्। बालकस्य गृहं परितः आङ्ग्लभाषायाः वातावरणं नासीत्। बालकः शनैः शनैः पश्चात् पदः जातः। यावत् सः सप्तम-अष्टमकक्षायां प्राप्तवान् तावत् सः अनेकेषु विषयेषु अनुत्तीर्णः अभवत्, येन तस्य आत्मसम्माने, सृजनशीलतायां च क्रमेण ह्रासः अभवत्। आङ्ग्लभाषामाध्यमः विद्यालयः तम् अग्रिमायां कक्षायां पाठयितुं नैच्छत् अतः अभिभावकेन तस्य प्रवेशः हिन्दीमाध्यम-विद्यालये प्रवेशः कारितः। प्रथमत्रिचतुर्मासान् यावत् बालकस्य नूतनं वातावरणं ज्ञातुं समयः व्यतीतः, परन्तु तदनन्तरं बालकः स्वस्य अतीतं न दृष्टवान्। यतोहि इदानीं सः सर्वान् विषयान् 'स्वभाषायाम्' अवगच्छन् आसीत्। सः स्वस्य अवबोधं स्वस्य परिवेशेन सह संयोजयति स्म। शीघ्रमेव सः नवम्याः कक्षायाः वार्षिकपरीक्षायां प्रथमम् आगतवान्।

*–एकः प्रतिभागी*

## इतिहासस्य वातायनेन

मध्ययुगे तदनन्तरं च यानि हस्तशिल्पानि विकसितानि तानि स्व-स्वभाषायाः माध्ययमेनैव विकसितानि आसन् इति द्रष्टव्यम् । अस्य शिल्पकार्यस्य कृते पृथक् पृथक् केन्द्राणि आसन्। तत्र ते स्वस्य स्वस्य भाषायां ज्ञानं प्रवीणतां च प्रदत्तवन्तः, परम्परया उत्तरोत्तरं सा निपुणता गच्छति स्म। इदानीं सापि समाप्तप्राया, यतोहि पूंजीवादस्य विकासेन तानि सर्वाणि शिल्पानि अपि नाशितानि। तथा च तेनैव सह शिल्पसम्बद्धाः लोकोक्तयः अपि नष्टाः अभवन्। ताः भाषाः अपि नष्टाः अभवन्। तानि च शिल्पानि यानि बोधसाधनानि आसन् समाप्तानि। एवमेव जनजातीयानां जनानां पार्श्वे याः ज्ञानस्य बृहद्भण्डारसमन्विताः आदिवासिभाषाः आसन् ताः समाप्ताः, याः

अवशिष्टाः वर्तन्ते ताः अपि नष्टीक्रियन्ते। वर्तमाने यदादिवासिक्षेत्राणि सन्ति, तेषु शिक्षायाः माध्यमम् आंग्लभाषा अथवा हिन्दीभाषा अस्ति। विशेषतः तत्र आङ्ग्लभाषायाः विशेषः प्रभावः दृश्यते। तत्रापि स्वभाषासु शिक्षा अत्यल्पा एवास्ति। अनेन कारणेन क्षेत्रीयलोककलानां शिल्पानां च मृत्योः संकटः वर्धितः, हस्तकला-शिल्प-सङ्गीतानाञ्च उद्धाराय अस्माकं सविधे एकः एव मार्गः अस्ति – स्वस्यां भाषायां प्रौढता भवेत्।

> ख्रीष्टाब्दात् पञ्चशतम् ५०० वर्षपूर्वं वाराणसीनगरे एका घटना अघटत्। भगवान् बुद्धः प्रथमं प्रवचनं लोकभाषायां दत्तवान् तथा च तेन प्रवचनेन भाषाणां सीमानम् अतिक्रम्य सम्पूर्णे भारते सम्पूर्णे एशियादेशे च एका ज्योतिः प्रज्वालिता। मध्ययुगे यदा कबीरः वाराणस्याम् उक्तवान् 'संस्कृतम् अस्ति कूपजलम्, भाषा प्रवहन्नीरम्' इति तस्मिन् समये अपि अनेकाः भाषाः आसन्। परन्तु एषा वाणी भारतस्य सर्वासु भाषासु गता। भक्ति-आन्दोलनं समग्रं देशं एकतायाः सूत्रे बद्धुं सहायकः अभवत्। सर्वान् च समरसतायाः भावनया संयुक्तान् अकरोत्।
>
> *– एकः प्रतिभागी*

## सर्वेषां विषयाणां शिक्षकः भाषायाः शिक्षकः भवति

मानवमस्तिष्के भाषया सह प्रवर्तमाना समस्यानिराकरणप्रक्रिया कथं प्रचलति? तथा च केन प्रकारेण अवधारणाः विकासं प्रति नयति, यद्येतदवगम्यते तर्हि अवबोधस्य माध्यमं निश्चेतुं सरलता भविष्यति।

अवधारणानां विकासः अवधारणाः दत्त्वा न भवति। साहित्यम् अमूर्तम् अस्ति, परञ्च तत्रापि अवधारणानां विकासः प्रचलत्येव। सामाजिकाध्ययनस्य बहव्यः अवधारणाः मानचित्राणां साहाय्येन निर्मिताः भवन्ति प्रकाश्यन्ते च। गणितस्य साहाय्येन मानचित्रम् अवगन्तुं शक्यते। गणितं स्वयमेव मानचित्रम् अवगन्तुं विशिष्टं बोधं जनयति। मानचित्राणि इतिहासं बोधयितुमपि सहायकाः भवन्ति। गणितस्य अवधारणाः स्थूलाः दीर्घकालीनाश्च सन्ति। एतदर्थं तस्य स्वरूपम् अवगन्तुं शक्यते। परञ्च सामाजिकाध्ययनस्य स्वरूपं परिवर्तमानम् एव भवति, यत् स्वभाषायाः माध्यमेन एव अवगम्यते।

प्राथमिकशिक्षायाः सम्पूर्ण-पाठ्यचर्यायाम् भाषायाः परिप्रेक्ष्यं विशिष्टम् महत्त्वम् आदधाति। विभिन्नानां सार्थकसन्दर्भाणां माध्यमेनैव भाषाः सम्यक्-तया सर्वोत्तमविधिना चाधिगन्तुं शक्यते, अतः प्रत्येकं विषयस्य शिक्षणम् एकस्मिन्नर्थे भाषाशिक्षणमेव वर्तते। एषः दृष्टिकोणः माध्यमिकशिक्षायाः अमूर्तविचारसन्दर्भे भाषायाः केन्द्रत्वं रेखाङ्कितं करोति। यत्र प्रारम्भिकस्तरे सन्दर्भगताः अर्थाः भाषायाः प्रयोगं प्रवर्धयन्ति, तत्रैव उत्तरवर्तिस्तरेषु केवलं भाषायाः माध्यमेनैव अर्थं प्राप्तुं शक्यते। भाषा शिक्षायाः केन्द्रे अस्ति तथा च प्रत्येकं शिक्षकः आदौ भाषायाः अस्ति ततः विषयस्य ।

*– एकः प्रतिभागी*

## चिन्तनस्य स्वातन्त्र्यम् मौलिकतायाश्च प्रश्नः

गान्धीवर्यः नवशिक्षायाः योजनानिर्माणं कुर्वन् स्वस्य मित्रस्य पाठशालायां बालान् पृष्टवान् – यदि ''एकः व्यक्तिः चतुर्णां नाणकैः सेबफलं क्रीत्वा तस्य एकरूप्यकेन विक्रीणाति। तर्हि सः किं प्राप्स्यति?'' गान्धीवर्याणां चिन्तनमासीत् यत् यदि बालकः प्रतिक्रियारूपेण एतन्न वदति यत् 'सः कारागारं प्राप्स्यति' तर्हि सः भाषायाः गणितस्य च सामञ्जस्य विधानं कुर्वन् स्वतन्त्रभारतस्य बालकः इव योग्यतां न धारयति। भाषाविषये अस्माभिः स्वबालानां कृते तादृशी स्वतन्त्रता दातव्या भविष्यति यस्यां सः स्वभाषायां स्वाभिव्यक्तिं प्रकटयितुं शक्नुयात्। एतत् स्वभाषायां शिक्षामाध्यमेनैव सम्भवति।

विज्ञानस्य छात्रेषु दायित्वद्वयं भवति। तेषां कृते द्वयोः भाषयोः युगपत् ज्ञानम् आवश्यकम् अस्ति। एका अवगमनस्य भाषा अपरा विज्ञानस्य च। विज्ञानं बिम्बेषु न वदति। तत् स्पष्टं वक्तुम् आग्रहं करोति। तत् निर्भीकतया टिप्पणीं करोति। विज्ञानस्य छात्रः 'अनुरूपवादी' अपि भवितुम् अर्हति। बुद्धः अवदत् यत् ''वृद्धैः उक्तत्वात् वचनं मा विश्वसिहि, परीक्ष्यताम्, संवीक्ष्यतां ततः स्वीक्रियताम्।'' एतत् सर्वं शिक्षायां स्वभाषायाः स्वतन्त्रतां विना न सम्भवति। एषा स्वतन्त्रता आचार्याय दातव्या भविष्यति। प्रत्येकं शिक्षकः भाषाशिक्षकः भवति सः गणितस्य विज्ञानस्य वा भवेत्। भाषाशिक्षणं सर्वेषां दायित्वं भवति, न केवलं भाषाशिक्षकस्य। गणित-

सामाजिकविज्ञान-अर्थशास्त्रादिषु विषयेषु च मूलभूतचिन्तनं स्वभाषायां शिक्षायाः माध्यमेनैव सम्भवति।

## भाषाः अन्यविषयाश्च

भाषा अस्माकं सर्वेषां चेतसि वर्तते। अवधारणानां संरचना अनया भाषया एव निर्मीयते। स्वस्य अनुभवानाम् आधारेण वयं मनसि समागतानि चित्राणि सजीवं कृत्वा ज्ञानम् अग्रे प्रेषयामः। गणित-विज्ञानादिषु सर्वेषु तादृशाः अवधारणाः सन्ति याः विभिन्नवस्तूनाम् प्रकृतिं अस्माकं पुरतः तस्मिन्नेव रूपेण स्थापयन्ति। यथा – पृथिवी वृत्ता अस्ति; अत्र वृत्तस्य अवधारणा स्वयमेव अस्माकं पुरतः उत्पद्यते। द्वे रोटिके, त्रयः भ्रातरः। वयं रोटिकां 'द्वे'संख्यया, भ्रातरं 'त्रयः' इत्यनेन पदेन सह संयोजयितुं समर्थाः स्मः। चतुर्वर्षीयः बालः एतत्सर्वं कर्तुं शक्नोति। आसन्दस्य परिभाषा सर्वेषां कृते भिन्ना भविष्यति। एका अवधारणा अन्याभिः अवधारणाभिः सह कथं सम्बद्धा अस्ति, बालाः जानन्ति, विद्यालये याः परिभाषाः दीयन्ते, येन प्रकारेण दीयन्ते भवन्ति, तासु संशयः भवितुं शक्नोति। बालानाम् एका स्वकीया भाषा भवति यस्यां सः स्वस्य व्यक्तित्वस्य निर्माणम् अकरोत्, एका समाजस्य भाषास्ति, ततः विषयस्य भाषा अपि महत्त्वपूर्णा भवति यस्यां तेन सूचनाः संग्रहणीयाः भवन्ति। बालाः यां भाषां जानन्ति, तस्यां भाषायां पठनं, लेखनं, विषयाणाम् अवगमनं च सुकरं भवति। अस्य क्रियान्वयनं कथं भवेदिति अस्माभिः निर्णयः करणीयः। यदि पठनलेखनयोः आरम्भिकवर्षेषु स्वावबोधस्य निर्माणार्थं वर्धनार्थं च स्वशब्दाः प्राप्यन्ते तर्हि विषयाः सरलाः भवन्ति, प्रतिबिम्बनिर्माणञ्च सरलं सुकरं च भवति।

विद्यालयेषु गणिते 'सिलिण्ड्रिकल' इत्यस्य कृते 'बेलनाकारः' इति शब्दः शिक्ष्यते। अयं शब्दः बालानां मनसि किं प्रतिबिम्बं आनयति - कन्दुकम्, वर्तुलम्, वृत्तम् , वृत्ताकारम्, , गोलाकारम् इत्यादयः ।

## प्राविधिक-शब्दावली बालानाम् अवबोधश्च -

अत्र वयं बालानां पूर्वज्ञानस्य नूतनज्ञानेन नूतनशब्दकोशेन साकं सम्बन्धं कर्तुम् इच्छामः। बेलनाकारस्य स्थाने 'कङ्कणाकारः', 'कन्दुकाकारः' इत्यादयः शब्दाः किमर्थं न प्रयोक्तुं शक्यन्ते? चुम्बकानां कृते आकर्षण-विकर्षणपदयोः प्रयोगः भवति। एते शब्दाः सामान्यतया न प्रयुक्ताः भवन्ति तर्हि अज्ञातशब्दानां किमर्थं भारं युञ्जीत। अत एव बालानां स्थितिरेषा अस्ति यत् ते शक्तिम्, सामर्थ्यम्, बलम्,

ऊर्जाञ्चेति शब्दान् समानरूपेण प्रयुञ्जन्ते, परञ्च तकनीकीपरिप्रेक्ष्ये प्रयोगे सति तेषां अर्थाः परिवर्तन्ते। वयं बालानां चेतः उपयोक्तुं शक्नुमः किम् ? कानिचन उदाहरणानि एनसीईआरटीसंस्थायाः पुस्तकेभ्यः –

**सीमायाः शतम्**

सीमा विभिन्नप्रकारकैः बिन्दुभिः एकाम् आकृतिं निर्मितवती।



- विभिन्नान् समूहान् सम्यक् अवलोक्य कुलबिन्दुसङ्ख्यायाः अनुमानं कुर्वन्तु।
- केषाञ्चन अन्यसमूहानां चित्राणि रचयन्तु येन शतम् (100) बिन्दवः पूर्णाः भवेयुः। त्वया इतोऽपि कति बिन्दवः निर्मातव्याः?...

*स्रोतः – गणित का जादू, पुस्तकम् २, कक्षा २, एन.सी.ई.आर.टी.*

बालकाः कियत् सुलभतया गणितम् अधिगच्छन्ति, स्वपरिसरस्य च जीवनेन सह सम्बद्धाः भवन्ति।

**पत्राणि**

किं सर्वेषां पत्राणां वर्णाः, आकृतिः, तीरञ्च समानाः सन्ति ?

दयारामः अवदत् – पत्राणि अपि एतादृशानि भवन्तीति अहं न जानामि स्म। पश्यतु, कानिचित् वृत्तानि, कानिचित् दीर्घाणि, कानिचित् त्रिकोणीयानि च सन्ति।

शबनम् अवदत् – पश्यतु, पत्राणाम् तीराणि अपि कियत् भिन्नानि सन्ति। कस्यचित् पत्रस्य ऋजुः तीरम् अस्ति। कस्यचित्तु छिन्नं भिन्नम्। केषाञ्चन तीराणि तु अरित्रमिव सन्ति। अधुना अहं भविष्यामि 'वनस्पति-परी' अम्मु शबनम् च मिलित्वा उक्तवत्यौ।

कानिचन पत्राणि संगृह्णातु यथा – निम्बुकम्, आम्रम्, निम्बः, तुलसी, पुदीना, हरितधनिया इत्यादीनाम्। एतानि पत्राणि मर्दयित्वा तेषां गन्धं जिघ्रतु। किं सर्वेषां पत्राणां समानं गन्धम् अस्ति? किं त्वं एतानि पत्राणि गन्धेन एव ज्ञातुं शक्नोषि?

पश्यन्तु, कियत् सुन्दराणि चित्राणि कृतानि सन्ति। आम्, एतानि शुष्कपत्रेभ्यः एव निर्मितानि सन्ति। त्वमपि इदानीं शुष्कपत्रेभ्यः स्वस्य प्रतिलिपिपुस्तिकायां भिन्न-भिन्न-पशूनां चित्राणि रचयतु।

*स्रोतः – आस-पास, पर्यावरण-अध्ययनम्, कक्षा ३*

मरुभूमिजनैः स्वानुभवान् व्यवहारे स्थापयितुम् एकं शास्त्रं विकसितम् अस्ति। एतेन शास्त्रेण समाजाय उपलभ्यमानं जलं त्रिधा विभक्तम् अस्ति। प्रथमरूपमस्ति 'पालरपानी' अर्थात् वर्षायाः साक्षात् समागतं जलम्। इदं भूमौ प्रवहति एनं नदीतडागादिषु संरक्ष्यते। जलस्य द्वितीयं रूपं 'पातालपानी' उच्यते। एतज्जलं तत् भूजलं विद्यते यत् कूपेभ्यः आकृष्यते। 'पालरपानी'-पातालजलयोर्मध्ये जलस्य तृतीयं रूपं विद्यते 'रेजाणीपानी'। धरातलात् अवतरितं किन्तु पातालपर्यन्तं यज्जलं न गतम् तज्जलम् 'रेजाणी' भवति।

*– स्रोतः वितानभागः १, कक्षा ११, हिन्दी, एन.सी.ई.आर.टी.*

एते उदाहरणे सरलशब्दावल्यां पर्यावरणं बोधयतः। द्वितीये उदाहरणे पालरपानी, पातालपानी, रेजाणीपानी इत्यादीन् क्षेत्रीयशब्दान् सरलरूपेण व्याख्यातवान् अस्ति न तु तकनीकीशब्दावल्याम्, बालाः एतां प्रक्रियां रटनं विनैव सहजतया अवगमिष्यन्ति।

## अन्यानि कानिचन उदाहरणानि –



सुगन्धा अद्य अतीव प्रसन्ना अस्ति। तस्य विद्यालयस्य सर्वे बालाः शिक्षकैः सह भोपालनगरं भ्रमणार्थं गच्छन्ति। मीनाक्षीवर्या राकेशमहोदयश्च परस्परं वार्तां कुरुतः यत् कियन्ति बसयानानि आवश्यकानि?

मीनाक्षी – अस्माकं कृते चत्वारि बसयानानि आवश्यकानि।

राकेशः – अहं मन्ये पञ्च बसयानानि आवश्यकानि भविष्यन्ति।

मीनाक्षी – प्रत्येकं बस याने पञ्चाशत् (५०) आसनानि सन्ति।

राकेशः – आदौ जानातु यत् कति बालाः गच्छन्ति।

| कक्षा | बालानां संख्या |
|---|---|
| I | ३३ |
| II | ३२ |
| III | ४२ |
| IV | ५० |
| V | ५३ |
| सम्पूर्णम् | ......... |




- अतः समग्रतया....................बालाः गच्छन्ति।
- यदि चत्वारि बसयानानि प्राप्यन्ते तर्हि कति बालकाः उपवेष्टुं शक्नुवन्ति?
- किं कश्चित् बालः उपवेष्टुं न शक्नोति ?




*– गणित का जादू, पुस्तकम् २, कक्षा २, एन.सी.ई.आर.टी.*

**शीघ्रं शीघ्रं द्रुतं द्रुतम्**

बालाः कक्षायां एकस्मिन् वृत्ते उपविष्टाः सन्ति।

एते एतां क्रीडां क्रीडन्ति गायन्ति च।

किमस्ति लम्बम्, किमस्ति वृत्तम् ?

शीघ्रं वदतु, शीघ्रं वदतु।

रीना वदति –




सर्वे बालाः गायन्ति

किमस्ति लम्बम्, किमस्ति वृत्तम् ?

शीघ्रं वदतु, शीघ्रं वदतु।

मोनू कथयति –




इत्थमेव क्रीडा प्रचलति।

- त्वमपि इमां क्रीडां स्वस्य कक्षायां क्रीड । यथाक्रमम् एकस्य दीर्घस्य एकस्य वृत्तस्य वस्तुनः नाम वदतु। क्रीडायां यस्य वस्तुनः नाम वारैकम् उक्तं तस्य नाम पुनः न वक्तव्यम्।

*– गणित का जादू, पुस्तकम् २, कक्षा २, एन.सी.ई.आर.टी.*

**भीमबेटकाम् प्रति**

बसयानानेषु डीजलतैलम् पूरयित्वा अनन्तरं पुनः यात्रा आरब्धा। इदानीं बालानां कृते प्रबोधनं कृतं यत् ते आदौ भीमबेटकायां स्थास्यन्ति

अञ्जनः – भीमबेटका किम् अस्ति ?

रैना महोदया– एतदेकं स्थानम् अस्ति यत्र बहव्यः गुहाः सन्ति। गुहासु चित्राणि चित्रितानि सन्ति यानि दशसहस्रवर्षपूर्वं निर्मितानि सन्ति।

सुमोतो – दश.. सहस्र...वर्षम्... अहं तु एकसहस्रवर्षपूर्वमपि चिन्तयितुं न शक्नोमि।

गोपी – अहो! एकवर्षसहस्रं तु अधिकं भवति, अहं तु शतवर्षपूर्वमपि चिन्तयितुं न शक्नोमि।

गौरी – अहं 100 वर्षाणि चिन्तयितुं शक्नोमि यतोहि मम पितुः पितामही १०० वर्षीया अस्ति ।

मञ्जीतः – इत्यस्य तात्पर्यं यत् एताः गुहाः प्रायेण शतं प्रपितामहीसमाः प्राचीनाः सन्ति !!

सर्वे उच्चैः अहसन् – हा! हा! हा!

बालाः गुहासु कृतानि चित्राणि द्रष्टुम् इच्छन्ति स्म । प्रायः प्रातः ११ वादने ते भीमबेटकां प्राप्तवन्तः।




*स्रोतः – गणित का जादू, पुस्तकम् २, कक्षा २, एन.सी.ई.आर.टी.*

शङ्करः – अस्मिन् चित्रे बहुबृहत् वृषभाः निर्मिताः सन्ति। अरे मम मनसि एकः विचारः आगतः। एतेषु चित्रेषु अहं वृषभान् गणयामि त्वं च मृगान् गणय।

बोनोमाला – अहं जनान् गणयामि। पश्यामः के अधिकाः सन्ति – वृषभाः, मृगाः, जनाः वा।




- अत्र वृषभात् मृगाः कति अधिकाः सन्ति ? ........................
  परन्तु बोनेमाला सर्वाधिका प्रसन्ना आसीत् यतोहि जनानां संख्या वृषभ-मृगेभ्यः अधिका आसीत् । परन्तु तस्याः गणना २०० संख्यातः न्यूना आसीत् ।
- तया कति जनाः गणिताःस्युः?
  २१४, १५४, १३४, १७७
  मार्गदर्शकः अवदत् यत् अत्र सर्वं संकलय्य ६०० गुहाचित्राणि सन्ति।
  इदानीं भीमबेटकातः गमनस्य समयः अभवत् ।

*स्रोतः गणित का जादू, पुस्तकम् 2, द्वितीया कक्षा, रा.शै.अ.प्र.*

*(उपर्युक्तानि सर्वाणि उद्धरणानि सहजभाषया विषयान् प्रस्तोतुं सुन्दराः प्रयासाः सन्ति।)*

## उच्चशिक्षा अन्ये विषयाश्च

अनेन सम्बद्धः द्वितीयः प्रश्नः भवति यत् यदि एताषां भाषाणां प्राथमिकस्तरे उपयोगः भवेत् तथा च तेभ्यः एताषु भाषासु प्राथमिकशिक्षा दीयते तर्हि अग्रे किं भविष्यति? विचिन्तयन्तु दशमवर्गपर्यन्तं ते एवं प्रकारेण पठेयुः, तदनन्तरम् अग्रिमाध्ययनं ते कस्यां भाषायां करिष्यन्ति? दशमवर्गपर्यन्तं ते संथालीभाषायां अध्ययनं कृतवन्तः, परन्तु यदा ते एकादशवर्गे गमिष्यन्ति अथवा अभियान्त्रिकीं, चिकित्साशास्त्रं वा पठितुं गमिष्यन्ति तदा तेषामध्ययनं कस्यां भाषायां भविष्यति? यदि ते केवलं बी.ए., एम. ए. अपि करिष्यन्ति चेदपि कस्यां भाषायां पठिष्यन्ति? यदि ते केवलं संथालीसदृशासु आदिवासीभाषासु एव अध्ययनं कुर्वन्ति तर्हि अस्माकं विश्वविद्यालयाः एताषु भाषासु अध्यापनं कर्तुं समर्थाः सन्ति किम्? यदि ते संथालीभाषायाम् अध्ययनं कृतवन्तः तर्हि तृतीयः प्रश्नः भविष्यति यत् ते वृत्तिं प्राप्स्यन्ति किम्? यदि वृत्तिः न मिलिष्यति तर्हि किमर्थं न मिलिष्यति? एषा कीदृशी व्यवस्था अस्ति या स्वभाषायां अधीतानां नागरिकाणां कृते वृत्तिं दातुं न शक्नोति। अत्र वृत्तिं प्राप्तुम् आङ्ग्लभाषायाः ज्ञानं अनिवार्यं जातम्। यद्यपि सम्प्रति समग्रविश्वे निरन्तरम् अधोगमनस्य मन्दतायाश्च कालः समागतः तत् दृष्ट्वा पुनः समग्रः विश्वः केवलं आङ्ग्लभाषायाः ज्ञानं पर्याप्तं नास्तीति चिन्तितवान्। अस्माभिः बालानां समाजस्य च कृते एतद्-विश्वासो दातव्यः भविष्यति।

प्राथमिकशिक्षातः आरभ्य देशस्य अर्थव्यवस्थापर्यन्तं एतत् तन्त्रं विस्तृतम् अस्ति। न केवलं अवबोधमाध्यमस्य विषयः, अपितु प्रश्नः अयमपि भवेत् यत् अवबोधमाध्यमं संप्राप्य अनन्तरं जीवनस्य माध्यमं किं भविष्यति? अर्थात् वयम् अवबोधं प्राप्स्यामः किन्तु कथं जीविष्यामः यावत् एतादृशी अर्थव्यवस्था सामाजिकी व्यवस्था च न निर्मिता भविष्यति। तावत् अवबोधमाध्यमत्वेन अस्माकं मातृभाषाणां देशस्य सहस्राणां भाषाणां च भविष्यं

> *उच्चशिक्षायामपि अस्य अवबोधस्य आवश्यकता वर्तते। परन्तु केचन विषयाः विचारणीयाः सन्ति। किं सर्वाषु भाषासु एतावत्-सामग्री उपलभ्यते? किं जगति शिक्षाविषये यदेतावत् चिन्तनं वर्तते, किं तत्सर्वासु भाषासु उपलभ्यते?*
>
> *– एकः प्रतिभागी*

न दृश्यते, अत एव अगतिकगतिकत्वात् ग्रामेषु हिन्दीभाषायाः आङ्ग्लभाषायाश्च लक्षशः उपहासं कृत्वापि अन्ततः विकल्पाभावात् प्रत्येकं माता-पितरौ स्वसन्ततिं हिन्दीभाषायाम् अथवा आङ्ग्लभाषायामेव पाठयितुं बाध्यौ भवतः। तत्रापि आङ्ग्लभाषायां पाठनं सर्वोत्तमम्। ते संशयरहिताः भवन्ति यत् यत्किमपि भवतु, ते जीविकां तु प्राप्स्यन्ति एव। अस्माभिः यः समाजः निर्मितः तस्य समाजस्य परिवर्तनस्यापि प्रश्नः अस्ति तदा एव वयं अवबोधस्य माध्यमं स्वभाषां कर्तुं समर्थाः भविष्यामः।

रूसदेशे विश्वस्य अन्येषु देशेषु यथा – जापान-चीन-आदिदेशैः आरम्भादेव विश्वविद्यालयस्तरपर्यन्तं स्वभाषायां शिक्षा प्रदत्ता। जर्मनीदेशः अपि तथैव कृतवान्। चीनदेशः अपि तथैव करोति। स्वस्य आङ्ग्लभाषालोभस्य सत्वेऽपि तत्र चीनीभाषा एव प्राथमिकस्तरात् आरभ्य उच्चस्तरं यावत् ज्ञानस्य भाषा वर्तते।

किन्तु अस्माकं देशे सम्प्रति एवं नास्ति। अस्मात् कारणादेव अस्माकं भाषाः ज्ञानस्य भाषाः न अभवन्। स्वातन्त्र्यात् पूर्वं विभिन्नेषु क्षेत्रेषु ये विद्वांसः आसन् ते मौलिकचिन्तकाः आसन्, कालान्तरे ते न्यूनाः अभवन्। जगदीशचन्द्रबसुः स्वस्य अनेकानि पुस्तकानि बङ्गलाभाषायां लिखितवान्। अनन्तरम् अनेनैव संस्कारेण प्रेरितः सन् महान् वैज्ञानिकः जयंतनार्लीकरः मराठीभाषायां हिन्दीभाषायां च लेखनं कृतवान्। मेघनाथसाहाः स्वस्य पुस्तकानि बङ्गलाभाषायां लिखितवान्। इत्थं ज्ञानस्य विभिन्नक्षेत्रेषु जनाः आगताः तथा च ते स्वभाषासु मराठी-बंगाली-तेलुगु-तमिल-मलयालमभाषासु ज्ञानस्य प्रसारं कृतवन्तः। कालानन्तरे क्षेत्रीयभाषासु लेखनं न्यूनम् अभवत्। एतत् वर्धनीयम् आसीत् किन्तु एतत् न्यूनं जातं यतोहि अस्माकं लक्ष्यं केवलं उपादेयता एव जातम्। एतादृशोपयोगिजनानां सज्जीकरणम् एव लक्ष्यं संजातं ये भोजनं अर्जितुं शक्नुयुः। समग्रः देशः एतादृशान् जनान् उत्पादयति स्म ये वस्तुविक्रयं कर्तुं शक्नुवन्ति, वस्तुविक्रयिणां सेवां कर्तुं शक्नुवन्ति, तथा च ये विक्रयणार्थं बहिस्तात् वस्तूनि आनेतुं शक्नुवन्ति। एतस्याः परिस्थितेः निराकरणाय स्वभाषायां शिक्षाविषये अधिकं बलं दातव्यं भविष्यति। अस्माभिः स्वभाषा ज्ञानभाषा कर्तव्या भविष्यति तथा चैतस्य कृते विविधभाषाणां, विविधज्ञानानाञ्च मध्ये संवादं स्थापनीयं भविष्यति। सम्प्रति ज्ञानस्य भाषया आङ्ग्लभाषयापि नैकेषु स्तरेषु संवादः व्यवहर्तव्यः भविष्यति।

ध्यातव्यं यत् रूसदेशेन यः समाजः १९१७ ईस्वीयवर्षानन्तरं निर्मितः सः एतादृशः समाजः आसीत्, यत्र लघुतमभाषायाः कृते अपि स्थानम् आसीत्। महमूदरसूलः हामजातोवः सदृशः लेखकः, यः दागिस्तानदेशस्य निवासी आसीत्, स्वस्य कुटुम्बे प्रथमः व्यक्तिः आसीत् यः अध्ययनं कृतवान्। तस्य भाषा अवार आसीत्। 'अवार'भाषाभाषिणः प्रायेण द्विचतुर्लक्षं (२-४लक्षम्) जनाः आसन्। इदानीम् इतोऽपि न्यूनाः भवितुं शक्नुवन्ति। किन्तु एतेषां २-४ लक्षजनानाम् कृते स्वभाषायाम् अध्ययनार्थं तत्र स्थापितायाः व्यवस्थायाः परिणामः अभवत् यत् रसुल- हमजातोवः समः विश्वप्रसिद्धः लेखकः अभवत्। मम दागिस्तानम् 'मेरा दागेस्तान' तस्य अनुपमं पुस्तकमस्ति। कदाचित् जगति अन्यासां भाषायां एतादृशं पुस्तकं न लिखितम्। तस्य पुस्तकस्य जगतः अन्यासु भाषासु अनुवादः अभवत्। केवलं द्विलक्षजनानां भाषायां लिखितं एतत् पुस्तकं जगतः महान् पुस्तकेषु परिगणितम्। द्वितीयं क्षेत्रं पश्यामः यथा अफ्रीकादेशे एतत् न भवति। तत्रत्यभाषायां नूतनज्ञानस्य सृजनं न भवति। कीनियादेशस्य लेखकः अङ्गूगी आङ्ग्लभाषायां लेखने महान् अभवत्, परन्तु यदा सः स्वभाषायां किकियुभाषायां लेखितुम् इच्छति स्म तदा तत्रत्यैः जनैः तस्य बहिष्कारः कृतः, अद्य सः निर्वासितं जीवनं यापयति। अस्माकं देशोऽपि अद्यत्वे एतादृशीं समस्यां साक्षात्करोति। स्वभाषायाः श्रेष्ठतमोऽपि लेखकः कुत्रचित् कोणे उपेक्षित इव तिष्ठति। अस्मात् संकटात् बहिः गन्तुं मार्गं अन्वेषयन्तः अस्माभिः रूस-जर्मनी-चीन-जापानादिभ्यः देशेभ्यः अवगमनं कृत्वा स्वभाषाः विज्ञानेन सह योजयितुं प्रवृत्तो भवितव्यः।

*– एकः प्रतिभागी*

## मम अनुभवः

मातृभाषायै सर्वाधिकं प्रेम सत्वेऽपि अहं भूमितिः, बीजगणितम् इत्यादीनां गुजरातीशब्दावलीम् इदानीं यावत् न जानामि। इदानीमहं अवगच्छामि यत् यद्यहं आङ्ग्लभाषायाः स्थाने गुजरातीभाषायाः माध्यमेन अध्ययनं कृतवान् स्यां तर्हि एकस्मिन् एव वर्षे तानि ज्ञानानि सहजतया अवगतानि स्युः येषां विषयाणां गणितं, ज्यामितिः, बीजगणितशास्त्रं, रसायनशास्त्रं, खगोलशास्त्रं च ज्ञातुं चतुर्वर्षं यावत् समयः अभवत्। तेषां विषयाणां ज्ञानं मम कृते इतोऽपि सुलभं स्पष्टतरं च स्यात्। मम गुजराती शब्दावली समृद्धतरा स्यात्। अहं अस्य ज्ञानस्य प्रयोगं स्वगृहे अकरिष्यम्।

× × ×

अहं इच्छामि यत् अस्माभिः तस्याः भाषायाः (आङ्ग्लभाषायाः) रत्नानि संग्रहणीयानि तथा च किमर्थम् एतस्याः एव, अपितु अस्माभिः विश्वस्य अन्यभाषायाः रत्नानि अपि स्वदेशीयभाषायाः माध्यमेन संग्रहणीयानि। रवीन्द्रनाथस्य विशिष्टरचनानां गुणं ज्ञातुं मत्कृते बङ्गभाषाध्ययनस्य आवश्यकता न स्यात्। अहं ताः उत्तमानुवादद्वारा प्राप्नुयाम्। गुजरातीबालकानां बालिकानाञ्च कृते टालस्टायः इत्यस्य कथानां आनन्दं प्राप्तुं रूसीभाषापठनस्य आवश्यकता न स्यात्। ताः कथाः उत्तमानुवादमाध्यमेन पठन्ति।

× × ×

शिक्षायाः माध्यमं तत्क्षणं येन केनापि मूल्येन परिवर्तनीयं तथा च प्रान्तीयभाषाणां कृते यथायोग्यं स्थानं प्राप्तव्यम्।

– *हरिजनः ९.७.३८ पृष्ठसंख्या-१७७, महात्मागांधी के चयनित कार्य, खण्डम्-५*

५

# भाषासु संवादः

(सन्दर्भः आङ्ग्लं हिन्दी च)



- **आङ्ग्लभाषा-हिन्दीभाषयोश्च सम्बन्धः**
- **१९६७ ईस्वीयानन्तरम्**
- **१९८७ ईस्वीयवर्षस्य कालः**
- **परिवर्तनस्य नवीनयुगम्**
- **आङ्ग्लभाषायाः विकासस्य इतिहासः**
- **नूतनशब्दानां निर्माणस्य आवश्यकता**

## आङ्ग्लभाषा-हिन्दीभाषयोश्च सम्बन्धः

स्वाधीनतान्दोलनस्य समये तदनन्तरं च राष्ट्रनिर्माणाय यत् कार्यं जायमानं वर्तते तस्मिन् आङ्ग्लभाषायाः अन्यभाषाभिश्च सम्बन्धः कदाचित् उत्तमः कदाचिच्च समस्यामूलकः अभवत्। १९४७ पर्यन्तं तयोः मध्ये विशेषप्रकारस्य सम्बन्धः आसीत्। तस्मिन् काले सर्वाणि कार्याणि स्वाधीनतायै हिन्दीभाषायै चापि समर्पितानि आसन्। एतेषां मनसि स्वभाषायाः कृते स्नेहः आसीत्, तथा च तस्याः कृते कार्यमपि कृतवन्तः, परन्तु आङ्ग्लभाषां प्रति द्वेषः नासीत्। स्वातन्त्र्यकाले इतोऽपि एकः विषयः दृष्टिपथम् आयातः। महान् वैज्ञानिकः जगदीशचन्द्रबसुः आत्मनः अनेकान् ग्रन्थान् बाङ्ग्लाभाषायां लिखितवान्। लक्ष्मणशास्त्री स्वभाषायां आङ्ग्लभाषायां चापि लेखनम् अकरोत्।

परन्तु १९४७ ईस्वीयवर्षानन्तरं स्थितिः परिवर्तिता। तदनन्तरं आङ्ग्लभाषायाः प्रवृत्तिः आरब्धा। अनेके वर्तमानाः इतिहासलेखकाः हिन्दीभाषायाः विकासस्य इतिहासोऽपि आङ्ग्लभाषायां लिखितवन्तः, न तु हिन्दीभाषायम्। साम्प्रतिकसमाज-शास्त्रिषु पूरनचन्द्रजोशीम् अतिरच्य प्रायः सर्वेषां लेखनं मूलतः आङ्ग्लभाषायामेव वर्तते।

## ईस्वीयवर्षः १९६७ अस्यानन्तरम्

१९६७ वर्षात् एकं परिवर्तनम् अभवत्। यदि अवधानपूर्वकं पश्यामः तर्हि २० वर्षात्मके कालखण्डे एतासां भाषाणां सम्बन्धे एकः भेदः समागतः। १९६७ ईस्वीयवर्षात्मकः कालः आङ्ग्लभाषायाः विरोधिकालः अथवा द्वेषस्य कालः इति वक्तुं शक्यते। कारपट्टिकाः, फलकाश्च विविधस्थानेषु परिवर्तिताः। बिहारः उत्तरप्रदेशश्चेत्यादिषु विरोधोऽयं अधिकः अभवत्। ये आङ्ग्लभाषायाः विरुद्धम् एतत् आन्दोलनं कुर्वन्ति स्म ते विस्मृतवन्तः यत् तेषां बालाः कुत्र कथं च शिक्षां गृह्णन्ति इति। एतदर्थं तेषु दिनेषु आङ्ग्लभाषामाध्यमेन शिक्षां गृह्णन्तः ये बालकाः आसन् तेषु अस्य कः प्रभावः आसीदित्यपि वृत्तान्तः अन्वेष्टव्यः। द्वितीयः पक्षोऽपि ज्ञातव्यः यत् ये आङ्ग्लभाषायाः अध्ययनं न कृतवन्तः ते आङ्ग्लभाषां विनापि अग्रे गतवन्तः। तैः सह किमपि अन्यायं जातं न्यायं वेत्यस्मिन्नपि विषये शोधं कर्तुं शक्यते। अस्य प्रारम्भः बहुकालात् प्रागेव अभवत्, यस्य रेखाङ्कनं नेहरूमहोदयेनापि 'डिस्कवरी आफ् इण्डिया' इत्यत्र कृतम् आसीत्। प्रश्नः उत्पद्यते यत् ''इङ्ग्लिस्थान''देशस्य द्वयोः रूपयोः कीदृशम् इङ्ग्लिस्थानरूपम् भारतम् आगच्छत्? शेक्सपियर-मिल्टनयोः; उदारवादिलेखानाम् उत शौर्यगाथाकथानकानाम्, राजनैतिकक्रान्तिः स्वतन्त्रतायाश्च कृते युद्धं कृतवताम्, विज्ञानोद्योगयोः उन्नतिवर्धकः इङ्ग्लिस्थानदेशः अत्र आगच्छत्? अथवा बहसियाना जाब्ता फौजदारीवाला इति, क्रूरव्यवहार-कारकः, सामंतवादी-प्रतिक्रियावादी इङ्ग्लिस्थानम् चागतवान्? (हिन्दुस्तान की कहानी, पृष्ठम्– ३३३) एते व्यापारिणः स्पेनदेशस्य भवेयुः पुर्तगालदेशस्य वा? एकः बृहत्प्रश्नस्तु उत्पद्यते एव? एतादृशाः काश्चन परिस्थितयः समुत्पन्नाः यत् केषाञ्चनाल्पजनानां पृथग् वर्गः निर्मितः। ते स्वकार्याणि आङ्ग्लभाषायां निरन्तरं कुर्वन्तः आसन्। तेषां कृते सर्वाः सुविधाः उपलब्धाः आसन्, अतः ते अग्रे प्रवर्धिताः। द्वयोः मध्ये संतुलनं ना भवत्। एतदर्थं बहुसंख्यकाः पश्चात् पदाः अभवन्।

विद्यालयीयशिक्षायां हिन्दीभाषायाः आङ्ग्लभाषायाश्च परिदृश्यं भिन्नरूपेणैव उद्भूतम्। तत्र प्रथमकक्षातः पञ्चमकक्षापर्यन्तम् आङ्ग्लभाषा नासीत्। षष्ठकक्षातः आङ्ग्लभाषायाः अध्ययनम् आरभ्यते स्म। शिक्षकाणां आङ्ग्लभाषायाः व्याकरणज्ञानम् अतीव उत्तमम् आसीत् किन्तु ते वक्तुं समर्थाः नासन्। यद्यपि लेखने सर्वेषां आङ्ग्लभाषा अतीव उत्तमा आसीत्, परञ्च सम्भाषणे प्रवीणता नासीत्। अयं कालखण्डः सामाजिकजनान् द्वयोः वर्गयोः विभक्तं कृतवान्। आङ्ग्लभाषायां

कार्यं कर्तृवतां जनानाम् एकः वर्गः, अपरश्च वर्गः एतेषां विरोधं कर्तॄणाम्।

## ईस्वीयः १९८७ वर्षस्य कालः

यदि वयं सप्तासीत्युत्तरेकोनशम् १९८७ इति वर्षस्य कालांशे आगच्छामः तर्हि वयं पश्यामः यत् इलेक्ट्रॉनिक-नव-संचारमाध्यमानां विशालं जगत् अस्माकं पुरतः आगतम्। एषः संचारक्रान्तियुगम् आसीत्। एकः अपरः एव संसारः अनुभूयमानः अभवत्। इदं प्रतीयते स्म यत् आङ्ग्लभाषां विना बालाः पश्चात्पदाः स्थास्यन्ति। ग्रामेष्वपि आङ्ग्लविद्यालयाः उद्घाटयितुम् आरब्धाः। आङ्ग्लभाषां विना ते पश्चात्पदाः स्थास्यन्ति इति सर्वे विश्वासं कर्तुं आरब्धवन्तः। अद्यापि सैव कालः प्रचलति। आङ्ग्लभाषाभाषी शुद्धं वदतु अशुद्धं वा, परं यदि सः प्रवाहेण आङ्ग्लभाषां वदति तस्य प्रभावः अधिकः भवति, सः वृत्तिमपि प्राप्नोति। अद्य यः समाजः अस्माकं पुरतः विद्यते, या आर्थिकी सामाजिकी च संरचना विनिर्मितास्ति सा आङ्ग्लभाषाधारिता एव। एकः प्रश्नः उत्पद्यते, यत् एतदनन्तरं किं भविष्यति.? किमस्मिन् विषये वयं किमपि चिन्तयितुं समर्थाः स्मः अथवा वयम् अन्धानुकरणं कुर्वन्तः स्मः.? बालानाम् अवबोधः कस्यां भाषायां निर्मितः भविष्यति एतस्य विषये चिन्तयितुं, परीक्षितुं वा कस्यचित्सविधे समयः नास्ति। आजीविका तु अन्यभाषामाध्यमेनापि प्राप्तुं शक्यते। परम् अवगमनं तु स्वभाषायामेव भवति। अस्माभिः एतदपि द्रष्टव्यं यत् भारते स्वातन्त्र्यानन्तरं कति वैज्ञानिकाः, अर्थशास्त्रज्ञाः, समाजशास्त्रज्ञाः वा सज्जीभूताः? अल्पसंख्यकाः एव। अवश्यमेव अस्य कारणं प्रारम्भिकस्तरे स्वभाषायां शिक्षायाः अभावः एव वर्तते।

## परिवर्तनस्य नूतनः समयः

अत्र भाषायाः सन्दर्भे पुनः परिवर्तनकालः आगच्छन् अस्ति। फ्रान्स-चीन-रूस-जापानदेशाः भाषाविषये नूतनरीत्या चिन्तयितुं आरब्धवन्तः। इदानीं ते स्वभाषायामेव भाषणे आनन्दम् अनुभवन्ति। परन्तु भारतस्य स्थितिः भिन्ना अस्ति। वयम् अद्यापि हीनभावनया ग्रस्ताः स्मः। स्वभाषां प्रति समाजस्य चिन्तनं बहु अनुकूलं सकारात्मकं वा नास्ति। अस्य बृहत्तमं प्रमाणमस्ति यत् स्वात्मसम्मानं त्यक्त्वापि वयं बालकान् आङ्ग्लभाषां पाठयितुम् इच्छामः।

आङ्ग्ल-हिन्दी-सम्बन्धस्य विषयेऽपि अस्माभिः अनया दृष्ट्या एव चिन्तनीयं भविष्यति यत् विश्वस्य अनेके बृहद्देशाः स्वभाषां संरक्षयन्तः, तस्याः सम्मानं च कुर्वन्तः अपि, बृहद्देशानां तुल्यतां प्राप्य विकासपङ्क्तौ अग्रे गताः सन्ति। अस्माभिः स्वजनानां कृते विश्वासः कारणीयः अस्ति यत् स्वभाषायाः सम्मानं कुर्वन् परभाषायाः अपि समादरः कर्तुं शक्यते।

स्वभाषायाः सम्मानार्थं कीनियादेशस्य प्रख्यातः आङ्ग्ललेखकः अङ्गूगी आङ्ग्लभाषायां लेखनं त्यक्त्वा 'कीकियु'इति स्वभाषां स्वीकृतवान्। पाब्लो नेरुदा इत्यस्य इच्छा आसीत् यत् स्वभाषायाम् अध्ययनार्थं विश्वविद्यालयाः उद्घाटिताः भवेयुः, परन्तु अन्या भाषा अपि तस्यामेव पङ्क्तौ स्थिता भवेयुः ।

## आङ्ग्लभाषायाः विकासस्य इतिहासः

अस्माभिः इदमपि ध्यातव्यं यत् आङ्ग्लभाषा अपि दीर्घसङ्घर्षानन्तरं वैश्विकभाषा इत्याख्यां प्राप्तवती अस्ति। पूर्वं इङ्ग्लैण्ड्-अमेरिकादेशयोः आङ्ग्लभाषा भारवाहकानां, कृषकाणां, कर्मकराणाञ्च भाषा आसीत्। शेक्सपियरमहोदयस्यापि इयमेव भाषा आसीत्। अर्थात् आङ्ग्लभाषा केवलं प्रभुत्वस्य भाषा नास्ति।

यदि वयं अस्याः भाषायाः विकासं पश्यामः तर्हि ज्ञायते यत् अस्माकं भाषा यत्संघर्षं कुर्वती वर्तते आङ्ग्लभाषा अपि तत्संघर्षं कृतवती अस्ति। षोडश- सप्तदश (१६-१७) शताब्द्यां यावत् आङ्ग्लभाषा ज्ञानस्य भाषा नासीत्। आत्मनः समुचितं स्थानं प्राप्तुं सापि संघर्षं कृतवती। स्थितिः एतादृशी आसीत् यत् केषाञ्चन आभिजात्यविद्यालयानाम् परिसरे कोऽपि आङ्ग्लभाषां वक्तुं न शक्नोति स्म। फ्रांसिस्-बेकनमहोदयः मैत्री-प्रेम-इत्यादिषु विषयेषु आङ्ग्लभाषायां लेखान् लिखितवान्, परन्तु न्यायस्य, दर्शनस्य, गणितस्य, अन्यस्य ज्ञानस्य च विषयाणां पुस्तकानि तेन केवलं लैटिनभाषायामेव लिखितानि आसन्। इङ्ग्लैण्ड्देशस्य वैज्ञानिकाः केवलं लैटिनभाषायां एव लिखन्ति स्म। न्यूटनवर्यस्य मातृभाषा आङ्ग्लभाषा आसीत्, परन्तु सः स्वस्य मुख्यपुस्तकानि लैटिनभाषायां लिखितवान्। तस्मिन् समये सोऽपि लैटिनभाषायाः एव प्रयोगं कृतवान्। यदा मध्यमवर्गात् वैज्ञानिकाः आगताः तदा ते आङ्ग्लभाषायां लेखनम् आरब्धवन्तः, एकोनविंशतिशताब्द्यां यावत् आङ्ग्लभाषा सर्वत्र व्यापृता। शिक्षायां आङ्ग्लभाषायाः प्रभावः वर्धितः। अद्यत्वे ज्ञानस्य बृहत्तमा भाषा आङ्ग्लभाषास्ति।

## नूतनशब्दानां विनिर्माणस्य आवश्यकता

एकपक्षतः विश्वस्य सर्वाः भाषाः एकीकृताः भवन्त्यः सन्ति, द्वितीयपक्षतः भाषाविदाः चिन्तिताः सन्ति यत् भाषाणां सीमानः भग्नाः भवन्ति। महाहट्टेन रसियनभाषा, आङ्ग्लभाषा, जर्मनभाषेत्यादीः सर्वाः समं कृताः। वस्तुतः भाषाः परस्परं संघर्षं कुर्वन्त्यः निर्मिताः भवन्ति। हिन्दीभाषायामपि आङ्ग्लादिभाषाभ्यः अनेके शब्दाः यथावत् गृहीताः सन्ति। परन्तु प्रत्येकभाषायाः स्वकीयं चरित्रं भवति, स्वकीयः स्वभावः भवति, स्वकीयः मनोभावः भवति। सा भाषा अन्यभाषाभ्यः सम्मुखीभूत्वा स्वविधिना नूतनशब्दान् विनिर्मयति। यथा – हिन्दीभाषा 'ऑफीसर' इति पदेन 'अफसर' इति पदं निर्मितवती, 'रिपोर्ट' इति पदेन 'रपट' इति, 'सीमेंट' इति पदेन 'सिलमिट' इति पदम्। परन्तु अधुना हिन्दीभाषायाम् आङ्ग्लाभाषां सम्मुखीकृत्य नूतनशब्दानां निर्मितेः आत्मविश्वासं सततम् अपक्षीयते। आङ्ग्लशब्दानां यथावत् अनुकरणं कर्तुं, तेषाम् यथोच्चारणं कृत्वा स्वीकर्तुम् आग्रहः प्रवर्धमानः वर्तते। यथा हिन्दीभाषायां 'केनेडा' इत्यस्य कृते 'कनाडा' इति कथनम्, 'ओलिम्पिक्स' इत्यस्य 'ओलम्पिक' इति कथनम्, अथवा 'चाइना' इत्यस्य कृते 'चीन' इति, 'रसिया' इत्यस्य कृते 'रूस' इति लेखनस्य प्रचलनं ह्रासतां गतम्। वयं तान् शब्दान् तेषां मूलोच्चारणेन सहैव व्यवहर्तुम् अभ्यस्ताः भवामः। एषा प्रवृत्तिः एकः संकेतः विद्यते

> भाषा केवलं शब्दार्थैः निर्मिता भवति किन्तु शब्दबिम्बैरपि निर्मिता भवति। यथा- यदि वयं कमलशब्दं गृह्णीमः तर्हि अस्माकं सर्वेषां चेतसि प्रफुल्लितकमलस्य बिम्बं निर्मितं भवति। यद् बिम्बं कमलशब्दात् पृथक् भवति। अर्थात् अस्माभिः कमलस्य यद्रूपं दृष्टं, तदेव अस्माकं कृते कमलं वर्तते। उदाहरणार्थं, यदि कथ्यते यत् - 'गृहस्य वीथिकायां स्थिता बालिका दुःखिता अस्ति'। तर्हि अस्माकं सर्वेषां चित्ते एकस्याः गृहवीथिकायाः चित्रं निर्मितं भवति। अद्यत्वे अतिप्रतिस्पर्धायुते काले एतेषां अर्थबिम्बानां कृते अवकाशो नास्ति।
>
> *– एकः प्रतिभागी*

यत् हिन्दीभाषा विगतवर्षेषु आत्महीनतयाः ग्रस्ता अभवत्। अस्याः सम्बन्धः समाजस्य सामर्थ्यादधिकः अस्ति, भाषायाः सामर्थ्यात् न्यूनः। डॉ. राममनोहरलोहियावर्यः भाषाविषये बहु कार्यम् अकरोत्। तेषां कथनम् आसीत् यत् शब्दाः परिष्करणाद् (अन्वेषणात्) आगच्छन्ति। शब्दाः अन्वेष्टव्याः। शब्दान् अन्विष्य नूतनशब्द-रचनायाः यत् कौशलं हिन्दीभाषायाम् उत अन्य-भारतीयभाषासु आसीत्। तत् अद्यत्वे आङ्ग्लभाषायाः पुरतः शनैः शनैः आत्मार्पणं कुर्वत् अस्ति। एतत् महत् संकटम् अस्ति। आङ्ग्लभाषापि हिन्दीभाषायाः अनेकान् शब्दान् गृहीत्वा स्वस्य प्रकृत्या तेषां परिवर्तनं कर्तुं प्रयत्नं कृतवती। अर्थात् हिन्दी-आङ्ग्लभाषयोः मध्ये भाषिकम् आदानप्रदानं वर्धितम् अस्ति। हिन्दीभाषायाम् उत कस्यामपि भाषायां प्रत्येकभाषायाः शब्दान् प्राभातिकवायुरिव स्वतन्त्ररूपेण निर्बाधं प्रवाहार्थम् अवकाशो दातव्यः। परन्तु अस्माभिः एतद् ध्यातव्यं यत् हिन्दीभाषया निरन्तरं स्वस्य द्वारपिधानार्थं प्रयत्नः कृतः अस्ति। अस्य सांस्कृतिक-

**संवादस्य प्रयासाः**

'सेकमोल' इति लद्दाखीभाषायाः मानकी-करणं प्रति प्रयासरतोऽस्ति। एतदर्थं ते लद्दाखीलिप्याम् एकं वृत्तपत्रं 'रेवाई ओजर'इति (Rewai odzer), एकां पत्रिकां 'मेलांग' (Melong) इति च प्रकाशयन्ति। अनेन बालकथाः आङ्ग्लभाषायां लद्दाखी-भाषायाञ्च उभययोः भाषयोः समक्षम् आनेतुं महत्त्वपूर्णं कार्यं कृतम् अस्ति।

एतदतिरिक्तम् इदम् प्राथमिकस्तरस्य ईवीएस-पाठ्यपुस्तकैः, भाषाविकासैश्च सह सम्बद्धम् अस्ति। यद्यपि एतानि पाठ्यपुस्तकानि आङ्ग्लभाषामाध्यमे सन्ति तथापि लद्दाखीभाषायाः शब्दानाम् आलोकेन प्रकाशिताः सन्ति। एतेषां योजना वर्तते यत् शिक्षकाणां कृते एतेषां लद्दाखी संस्करणम् प्रकाशितं भवेत्। इत्थं यदा शनैः-शनैः स्थानीयलद्दाखीभाषायां विषयवस्तूनि मुद्रितानि अभविष्यन् तदा लद्दाखीभाषायां पाठ्यपुस्तकानि समभविष्यन्।

*–भारतीयभाषाणां शिक्षणम्, आधारपत्रम्, १.३, पृष्ठम्-६०*

ऐतिहासिकानि वा कारणानि भवितुं शक्नुवन्ति। परन्तु अस्माभिः एतदपि विचारणीयं यत् याः भाषाः स्वस्य द्वाराणि उद्घाटितवत्यः आसन्, ता एव प्रफुल्लिताः। ध्वनि-विचार-शब्द-वाक्य-संरचनानां स्तरेषु भाषाणां सततं साम्यं मिश्रणञ्च भवति।

भाषा अस्माकं सम्बन्धेन निर्मिता भवति। देशे विदेशे यत्र कुत्रापि जनाः वध्यन्ते, यदि तैः सह अस्माकं सम्बन्धः नास्ति, वयं तेषां चिन्तां न कुर्मः तर्हि अस्माकम् अभिव्यक्तिः संवेदनारहिता भवितुं शक्नोति।

भाषायाः विषयोऽपि एकस्य प्रमुखस्य सामाजिकयुद्धस्य विषयः अस्ति। अस्मिन् युद्धे भाषा अत्यावश्यकम् उपकरणम् अस्ति। परन्तु अस्मिन् महत्तरे युद्धे अस्माभिः भाषायाः भाषिकं स्वरूपं परिज्ञाय आङ्ग्लभाषया सह संवादं कुर्वन् नूतनशब्दानां निर्माणार्थं प्रयत्नः करणीयः। आङ्ग्लभाषायाः लेखकैः एतत् कार्यं कृतं वर्तते।

प्रादेशिकभाषाणां शब्दानां माध्यमेन एका सम्भावना भवितुं शक्नोति। हिन्दीभाषा जनपदीयभाषाभिः यावत् पृथक् अपसरिता तावदेव एकाकिनी अभवत्। अर्थात् वर्णस्य, रसस्य, सम्बन्धस्य, कृषेः वणिजश्च शब्दाः यथाभूताः जनपदीयाः भवन्ति तथाभूताः नागरिकप्रयोगसम्पन्नाः न भवन्ति। यथा- पीडासम्बन्धिताः बहवः शब्दाः भोजपुरीभाषायां सन्ति ये हिन्दीभाषायां न सन्ति – 'दुखता' इति, 'बथता' इति, 'पिड़ाता' इति, 'टभकता' इति, 'कसकता' इति, 'टसकता' इत्यादयः। सर्वेषां शब्दानां भिन्नार्थसन्दर्भाः सन्ति। एकस्याः भाषिकसंस्कृतिरूपेण अस्माभिः हिन्दीभाषा स्थापनीया अस्ति। शब्दानां सम्मुखीकरणेन तस्याः संवर्धनं करणीयम् अस्ति। अतः आङ्ग्लभाषायाः शब्दानाम् अपेक्षया नूतनानां शब्दानां अन्वेषणार्थम् उत्तमः उपायः चिन्तनीयः भविष्यति। एवं प्रकारेण भाषाणां मध्ये शब्दानाम् आदान-प्रदानयोः, संवादस्य च मार्गः उद्घाटनीयः भविष्यति।



# ६
# विषयाः समाह्वानानि च

- **शिक्षकस्य सन्नद्धता**
- **सामाजिकी सन्नद्धता**
- **प्रशासनिकी सन्नद्धता**

अवबोधस्य माध्यमं क्रियान्वयनं कर्तुं सम्प्रति बहु किमपि कर्तव्यं भविष्यति। स्वातन्त्र्यस्य पञ्चसप्ततिः (७५) वर्षानन्तरम् अपि वयं एतत् निर्धारयितुं न क्षमाः। एषः मार्गः एकाकिना शिक्षकेन, शिक्षाप्रशासनेन, शिक्षाविज्ञेन वा कर्तुं न शक्यते। अस्माकं समक्षं एतादृशाः बहवः विषयाः बहूनि च समाह्वानानि सन्ति येषु समुदायस्य, शिक्षकाणां, प्रशासनस्य च भूमिका महत्त्वपूर्णा भविष्यति। एतस्य तथ्यस्य अवगमनं महत्त्वपूर्णम् अस्ति।

## शिक्षकस्य सन्नद्धता

बहुकालानन्तरं स्वस्य भाषां प्रति पुनरागमनस्य एषः आरम्भः अस्ति। यस्मिन् प्रथमा प्रमुखा च भूमिका शिक्षकस्य भवति, यः बालानां मातापित्रोः पश्चात् बालैः बालाभिश्च सह अधिकं समयं यापयति। लघुबालानां विद्यालयेन सह संयोजनम्, शिक्षया साकं सम्बद्धं कर्तुं शिक्षकस्य दायित्वम् अस्ति। विद्यालयस्य भाषायाः गृहभाषायाश्च मध्ये सेतुनिर्माणस्य कार्यमपि शिक्षकः करोति। एषा दूरता तदा एव पूरयितुं शक्यते यदा बालानां भाषया शिक्षा दीयते। एतदर्थं शिक्षकाणां प्रशिक्षणमतीव महत्त्वपूर्णम् अस्ति। राष्ट्रियपाठ्यचर्यायाः रूपरेखा – २००५ अनुशंसयति यत् आदिवासिक्षेत्रेषु नियुक्तानां शिक्षकाणां कृते तत्रत्या स्थानीया भाषा शिक्षितव्या। तत्र स्थानीयभाषायां पाठयितुं शिक्षकाय स्वतन्त्रता दातव्या भविष्यति। कक्षायां बहुभाषिकबालानां परिचयं कृत्वा संसाधनरूपेण तेषाम् उपयोगस्य स्वायत्ततापि अनया सम्बद्धास्ति ।

- अस्माकं देशे बहव्यः वाचः भाषाश्च सन्ति। अस्माकं सविधे अद्यापि बालानां

भाषासु पुस्तकानि नोपलभ्यन्ते। संविधाने द्वाविंशतिः (२२) भाषाः सूचीबद्धाः सन्ति। समस्या एषा वर्तते यत् एताषु २२ भाषासु अस्माकं सविधे पुस्तकानि उपलब्धानि न सन्ति। अस्योत्तरदायित्वम् अध्यापकस्य, सर्वकारस्य चोभयोः अस्ति। यदि सर्वकारः स्वदायित्वं न निर्वहति तर्हि बालानां मातृभाषया शिक्षाप्रदानं शिक्षकस्य कर्तव्यं भवति। राष्ट्रियपाठ्यचर्यायाः रूपरेखा – २००५ शिक्षकस्य एतस्याः स्वायत्ततायाः अनुशंसां करोति।

- शिक्षकः कक्षायां अध्यापनकाले शिक्षार्थिभ्यः अनुभवाधारितां पाठ्य-सामग्रीनिर्माणस्य उपक्रमः करणीयः भवति। बालानां कक्षायाः आवश्यकतानुसारं विकासकारणात् एषा सामग्री उत्तमा पाठ्यक्रमसामग्री भवितुम् अर्हति।
- अधिगमः तस्मात् सामाजिकवातावरणात्/सन्दर्भात् अधिकः प्रभावितः भवति। यस्मात् परिवेशात् शिक्षकाः शिक्षार्थिनश्च आगच्छन्ति। विद्यालयस्य कक्षायाश्च सामाजिकं वातावरणम्, अधिगमस्य प्रक्रियाम् उत सम्पूर्णशिक्षाप्रक्रियायाम् प्रभावितं करोति। एतन्मनसि निधाय विद्यार्थिणां मनोवैज्ञानिकविशिष्टतानां स्थाने तेषां सामाजिक-सांस्कृतिक-आर्थिक-राजनैतिक-सन्दर्भेषु अधिकसंवर्धनस्य आवश्यकता वर्तते – अस्मिन् अवगमनभाषायाः भूमिका ज्ञातव्या भविष्यति।
- शिक्षकानां कृते भाषायाः व्यापकावबोधः भवेत्।
- प्राथमिकस्तरे बालानां भाषाः संशोधनं विनैव यथावत् स्वीकरणीयाः। चतुर्थकक्षानन्तरं यदि समृद्धाः रोचकाः च अवसराः प्रदीयन्ते तर्हि बालाः स्वयमेव भाषायाः मानकस्वरूपं गृह्णन्ति, किन्तु अस्यां प्रक्रियायां बालकः गृहभाषां प्रति युक्तियुक्तं

> मातृभाषायां शिक्षणेन कक्षायां शिक्षणस्य समृद्धये सौविध्यं भविष्यति, शिक्षर्थिणां अधिका सहभागिता भविष्यति, उत्तमफलं च प्राप्स्यति। एतदर्थं पर्याप्तसुविधाः दातव्याः। मातृभाषायां शिक्षां प्रति सकारात्मिका दृष्टिः सुनिश्चिता भवेत्, येन शिक्षार्थी तन्माध्यमं स्वीकर्तुं संकोचं न कुर्यात् यस्यां सः सहजतया अवगन्तुं शक्नुयात्।
>
> *–भारतीयभाषाणां शिक्षणम्, राष्ट्रिय-फोकससमूहस्य आधारपत्रम्, १.३, पृष्ठम्-१५*

सम्मानबोधं धारयेत्। एतत् स्वीकरणीयं यत् त्रुटयः शिक्षणस्य भागाः सन्ति, तथा च बालाः यदा समर्थाः भवन्ति तदा ते स्वयमेव सम्यक् कर्तुं शक्नुवन्ति। त्रुटिषु, न्यूनतासु च ध्यानं न दत्त्वा अधिकसमयं छात्रान् व्यापकं, रोचकं, समाह्वानपूर्णञ्च निवेशं दातव्यम्।

- शिक्षणं कथं भवतीति, एतदवबोधः शिक्षकेषु अवबोधनीयः येन ते तदनुकूल-वातावरणस्य निर्माणं कुर्वन्तु।
- वञ्चितबालानाम्, विविधप्रकारेण असमर्थबालानाञ्च आवश्यकतया सहितं सर्वेषां बालानां शिक्षणस्य आवश्यकताः अवगच्छन्तु।
- अध्यापकैः विशेषेण अवधानपूर्वकं द्वितीयाभाषायाः अध्यापनपद्धतयः ध्यातव्याः।
- अध्यापनार्थं दृढा सन्नद्धता भवेत् या व्यावहारिकी सैद्धान्तिकी च भवेत्।
- बहुभाषावादस्य संसाधनरूपेण उपयोगः कथं करणीयः इति प्रशिक्षणं दातव्यम्।
- सहैव इदमपि बोधनीयं यत् बहुभाषावादस्य सीमानः काः सन्ति ?
- अध्यापकः सततं बालानाम् मातापितृभिः सह संवादं कुर्यात् ।
- सेवापूर्वं सेवारतप्रशिक्षणकार्येषु चैतादृशाः विषयाः (अवबोधस्य भाषा, बहुभाषिकता, भाषासु संवादः, भाषाणां स्थितिश्च) समावेशनीयाः ।
- विद्यालयेषु बालानां भाषणे श्रवणे चाधिकं बलं दातव्यं, न तु केवलं लेखने।

## सामाजिक-सन्नद्धता

- अद्य प्रत्येकं समुदायः स्वबालान् आङ्ग्लमाध्यमेन शिक्षयितुम् इच्छति। तेभ्यः अवबोधनीयं यत् तेषां बालकः यः आङ्ग्लमाध्यमेन शिक्षितः अस्ति सः मातृभाषया शिक्षितस्य बालकस्य अपेक्षया न्यूनः सृजनशीलः भविष्यति। सः विद्यालयस्य शिक्षां स्वजीवनेन सह संयोजयितुं समाजस्य वास्तविकतायाः अनुकूलतां च कर्तुं न शक्ष्यति। आङ्ग्लमाध्यमस्य शिक्षाव्यवस्था तेषां कृते केवलं रटनस्य विद्या भवति। एतत् समुदायस्य प्रतिनिधिजनानां (यथा-ग्रामस्य पञ्चायतः) दायित्वं भवेत्। तैः अवगन्तव्यं यत् बालानां मातृभाषायां शिक्षणं शिक्षार्थिणं सृजनशीलेन सहैव आत्मविश्वासेन पूर्णम्, समर्थवान् च करोति। अद्यत्वे अस्माकं समक्षं महत्समाह्वानं वर्तते यत् अस्माभिः समुदायस्य (अभिभावकानाम्) एतदवगमनं कथं निर्मातव्यम्।

- समाजस्य पुरतः माध्यमभाषायां शिक्षायाः विषये मुख्यतया द्वे समस्ये स्तः– एका आजीविकायाः समस्या, अपरा सामाजिकप्रतिष्ठायाः मान-सम्माननस्य वा। एतयोरुभयोः समस्ययोः निवारणाय एकस्याः दीर्घायाः सामाजिकसन्नद्धतायाः आवश्यकतानुभूयते, यस्यां संचारमाध्यमतन्त्रस्य महती भूमिकां भवितुं शक्नोति। समाजे विभिन्नसमुदायैः, अभिभावकैश्च सह मिलित्वा विश्वासः दापनीयः यत् आङ्ग्लभाषा एव शिक्षायाः माध्यमं नास्ति इति।
- एतदर्थं विभिन्नक्षेत्राणां मातृभाषासु अध्ययनं कृत्वा स्थानं प्राप्तवतां महत्व-पूर्णजनानां साक्षात्कारं तेषाम् अनुभवान् संचारमाध्यमेन (प्रकाशनम्, दूरदर्शनम्, अन्तरजालम्, पथनाटकम् इत्यादीनि) तेषाम् अभिभावकानां सविधे संप्रेष्यताम्।
- स्वभाषया पठित्वा क्षमतां प्राप्तवद्भिः युवभिः सह वार्तां कृत्वा तेषामनुभवाः प्रतिक्रियाश्च संचारमाध्यमैः अभिभावकान् निकषा प्रापणीयाः भवेयुः। येन एषः भ्रमः (आङ्ग्लभाषा सफलतायाः कुञ्चिकास्ति) भङ्गः कर्तुं शक्यते।

> **स्वभाषायां पठित्वा...**
>
> राजस्थानराज्यसेवापरीक्षायां हिन्दीमाध्यमेन प्रथमप्रयासेनैव सर्वोत्कृष्टानां श्रेणीषु (२००७तमे वर्षे तृतीयं स्थानम्) सफलतां सम्प्राप्य जितेन्द्रकुमारसोनीवर्येण एका अत्यन्ता गौरवपूर्णा उपलब्धिः अर्जिता।
>
> "प्रश्नः- भवदनुसारं अस्यां परीक्षायां हिन्दीमाध्यमम् अनुसृत्य सिद्धतायाः सफलतायाश्च विषये भवतः के विचाराः सन्ति?
>
> सोनी – मम दृष्टौ माध्यमस्य कश्चिदपि भेदः न भवति। यस्मिन् माध्यमे वयं स्ववचनानि अवगमनं च प्रभावीरूपेण व्यक्तं कर्तुं शक्नुमः, तदेव माध्यमम् अस्माकं कृते उपयोगी, उपयुक्तं च भवति। साम्प्रतिकाः परिणामाः हिन्दीभाषां प्रति अवस्थितं पूर्वाग्रहं विखण्डयन्तः प्रतीयन्ते।"
>
> *– प्रतियोगितादर्पणम्/जनवरी/२०१०, पृष्ठम्* ४६-४८

- एतादृशाणां केषाञ्चन विद्यालयानाम् उदाहरणानि समक्षं स्थापनीयानि ये मातृभाषायां शिक्षां प्रदाय समाजे महत्त्वपूर्णान् जनान् निर्मितवन्तः। यथा-

## व्यवसायस्य समाह्वानानि- १

अद्यत्वे हट्टस्य भाषा आङ्ग्लभाषा अस्ति। केवलं भाषाज्ञानस्य आधारेणैव आङ्ग्लभाषां यः जानाति सः अभ्यर्थी शीघ्रमेव व्यवसायं प्राप्नोति। किन्तु देशीयभाषायाः विज्ञः कुशलोऽपि अभ्यर्थी व्यवसायस्य प्रतिस्पर्धायां पृष्ठं गच्छति। इत्थं किमर्थम्? अद्यत्वे अत्र बहुराष्ट्रियसंस्थासु अवगमनस्य माध्यमम् आङ्ग्लभाषा अस्ति। व्यवसायार्थं अवगमनस्य माध्यमक्षेत्रे सर्वकारेण चिन्तनीयं भविष्यति तथा च स्वस्य काश्चन नीतयः परिवर्तयितव्याः भविष्यन्ति। यद्यपि अद्यत्वे समग्रे विश्वे मन्दतायाः कालः आगतोऽस्ति तथापि एतेन जनानां मध्ये एषः अवबोधः अभवत् यत् केवलं आङ्ग्लभाषायाः अध्ययनेन आजीविकां प्राप्तुं न शक्यते। तेषां कृते देशीयभाषासु व्यवसायस्य अवसरान् दृश्यन्ते। एतत् विश्वासरूपेण परिवर्तयितुं सर्वकारस्य समक्षम् समाह्वानं वर्तते।

*– एकः प्रतिभागीः*

'नेतरहट' विद्यालय इति, सरदारपटेलविद्यालयः इत्यादिः। एतेषु विशेषतया सर्वकारीयविद्यालयाः समाविष्टाः भवेयुः।

- अस्यां सामाजिकसन्नद्धतायां शिक्षकस्य भूमिका अपि महत्त्वपूर्णा अस्ति। अध्यापकाः स्वछात्राणां अभिभावकैः सह एतादृशानि समागमानि आयोजयेयुः येषु मातृभाषायाः महत्त्वं विषयाध्ययनादि (केस स्टडीज) माध्यमेन बोधयेयुः ।
- व्यवसायसम्बन्धिसमस्याभिः निवृत्यर्थम् उद्योगेषु स्वस्य भाषायाः महत्त्वे विविधव्यवसायेषु क्षेत्रेषु च मातृभाषाशिक्षायाः उपयोगम् (क्षेत्राणि यथा- चिकित्सकः, प्राशासनिकसेवा आईईएस इत्यादिः) अवधार्य कथाः वीथिनाटकानि लिखेयुः तथा च यथायोग्यस्थले (ग्रामेषु नगरविद्यालयेषु च) क्रीडेयुः। एतस्मिन् कार्ये काश्चन संस्थानां (एन.जी.ओ.) सहायतां ग्रहीतुं शक्यते।
- विद्यालयस्य शिक्षकाः स्वदायित्वनिर्वहणे असमर्थाः भवन्तः सन्ति, बालान् तेषां मातृभाषया शिक्षा न प्राप्यते, शिक्षार्थं मूलभूतसुविधाः न प्राप्यन्ते। एतादृशे सति विद्यालयप्रशासनस्य अर्थात् विद्यालयस्य प्रधानाध्यापकस्य एतद् दायित्वं भवति यत् ते बालानां कृते मातृभाषया पाठयितुं शिक्षकान् प्रोत्साहयन्तु, तदर्थं

ते तत्रत्यस्य समुदायस्यापि साहाय्यं ग्रहीतुं शक्नुवन्ति। बालानां ज्ञाननिर्माणार्थं मुख्याध्यापकः, बालानां, शिक्षकानां, समुदायस्य च मध्ये सेतुरूपेण कार्यं कुर्यात्। एतदर्थं स्वप्राशासनिकनीतिषु नमनीयताम् आनयन्तु।

## प्रशासनिकी सन्नद्धता

- वस्तुतः ग्रामं ग्रामं बालं बालं यावत् शिक्षां प्रापयितुम् अस्माभिः राज्यस्तरे बहुसज्जताः करणीयाः भविष्यन्ति। शिक्षा राज्य-केन्द्रयोः सामूहिकं दायित्वमस्ति। मातृभाषया शिक्षाप्रदानाय राज्यैः प्रत्येकं स्तरे अर्थात् समुदायानाम्, प्रशासनानाम्, विद्यालयप्रशासनानाम्, शिक्षकाणां च मध्ये सामञ्जस्यं संस्थाप्य पूर्णा सन्नद्धता कर्तव्या भविष्यति।
- अस्यां सन्नद्धतायां केन्द्रस्य भूमिका अतीव महत्त्वपूर्णा भविष्यति। केन्द्रस्य दायित्वम् अस्ति यत् राज्यैः सह समन्वयं कुर्यात्। एतदर्थं शिक्षक-समुदाय-अभिभावकैः सर्वैः सह संगोष्ठी-परिचर्चा- संवाद-परिसंवादादयः करणीयाः भविष्यन्ति। एतदनन्तरं एतां सन्नद्धतां क्रियान्वयितुं केन्द्रेण कार्यं कर्तव्यं भविष्यति, केन्द्रं राज्यैः सह मिलित्वा शिक्षकाणां प्रशिक्षकाणाञ्च सज्जीकरणं कुर्यात्, येन बालानां कृते स्वभाषायां वक्तुं, लेखितुं, पठितुं, संवादं कर्तुं च अवसरं प्राप्नुयात्।
- अधुना शिक्षायाः अधिकारस्य अधिनियमः पारितः अस्ति। अस्यान्तर्गतं विद्यालयसमित्यै केचन अधिकाराः दातव्याः भविष्यन्ति। विद्यालयप्रबन्धनसमित्याः माध्यमेनापि समुदायस्य सहभागिता सुनिश्चिता भवेत्। राष्ट्रियपाठ्यचर्यायाः रूपरेखा– २००५ इदमपि निगदति यत् एतत् कृत्वा विद्यालयप्रशासनम् अधिकं नम्यं भवितुमर्हति। ते स्थानीयरूपेण पाठ्यक्रमस्य निर्माणे भूमिकां वोढुं शक्नुवन्ति। एतदपि विचारणीयम्। एषः उत्तमः उपायः भवितुम् अर्हति।
- शिक्षाधिकाराधिनियमस्य क्रियान्वयने जाते सति लक्षशः शिक्षकाणां पुनःस्थापनस्य आवश्यकतापि भविष्यति। एतावता संख्याकानां शिक्षकाणाम् आगमने सति बहूनां शिक्षकाणां कृते प्रशिक्षणसंस्थानानि अपि उद्घाटितव्यानि भविष्यन्ति। एतस्मिन् विषये विचारः करणीयः भविष्यति।

## उच्चशिक्षाः एकं समाह्वानम्

यदा बालाः स्वमातृभाषायां शिक्षां प्राप्य उच्चशिक्षायाः कृते विश्वविद्यालयं प्राप्नोति तदा प्रश्नः उत्पद्यते यत् तस्य मातृभाषायां शिक्षां दातुं विश्वविद्यालये सुविधाः सन्ति वा.? यदि एतदर्थं सुविधाः न सन्ति तर्हि बालानां मातृभाषायां परीक्षां दातुं अधिकारः अस्ति वा.? यदि अस्ति तर्हि तस्य टिप्पणीपुस्तिकायाः मूल्याङ्कनं आङ्ग्लमाध्यमस्य छात्राणां समं क्रियते वा.? किं सः विद्यावारिधेः (पीएच. डी. इत्यस्य) शोधप्रबन्धं स्वमातृभाषायां लेखितुं शक्नोति वा.? उच्चशिक्षायां अवबोधमाध्यमस्य समस्या अस्माकं कृते, विश्वविद्यालयानाम् कृते अपि च देशस्य कृते सर्वाधिकं समाह्वानं वर्तते।

*– एकः प्रतिभागी*

- बालानां भाषायां पुस्तकानां उपलब्धतायाः विषये कार्ययोजना निर्मातव्या भविष्यति
- अस्मिन् सम्बन्धे राज्यसर्वकारस्य, शिक्षकाणाञ्च महत् दायित्वम् भवति। एतदपि सम्भवति यत् बालानां कृते तेषां भाषायां पाठ्यपुस्तकनिर्माणार्थं बहुकालं भवेत्। अस्मिन् सुदीर्घकाले राज्यसर्वकारैः शिक्षकैश्च अस्मिन् विषये संवादः स्थापनीयः भविष्यन्ति। अत्र केन्द्रसर्वकारस्य आक्षेपोऽपि नास्ति। मूलतः एषः राजनैतिकः प्राशासनिकश्च निर्णयः अस्ति ।
- अस्माकं देशे बहव्यः भाषाः सन्ति। अतः बालानां कृते सिद्धासु पाठ्यसामग्रीषु अस्माभिः तासां भाषाणां लोककथाः, लोककलाः, लोकगीतानि च समायोजनीयानि भविष्यन्ति। प्रत्येकं भाषायाः श्रेष्ठाः लेखकाः अस्माकं देशे वर्तन्ते। तेषां साहाय्येन पाठसामग्री अपि सज्जीकर्तुं शक्यते।
- अवबोधस्य भाषायाः अनुसारेण विद्यमानशिक्षकप्रशिक्षणकार्यक्रमाणां पाठ्यक्रमे परिवर्तनं कर्तव्यं भविष्यति।
- भाषासम्बन्धिशोधेषु स्वस्य भाषायां हिन्दीभाषायाञ्च श्रेष्ठतमं शोधं भवतु इत्यास्यापि आवश्यकता भविष्यति।
- हिन्दीभाषायाम् अन्यभारतीयभाषासु च मौलिकरूपेण विज्ञानस्य, समाजशास्त्रस्य, कलादीनां पुस्तकानि लेखितुं प्रयासो विधेयः। एतदर्थं विश्वविद्यालयैः सहापि

सम्पर्कः करणीयः।

- सन्दर्भपुस्तकानाम्/पाठ्यपुस्तकानाम् आङ्ग्लभाषायाः हिन्दीभाषायाम् अन्य-भारतीयभाषासु च अनुवादः करणीयः। द्विभाषी बहुभाषी च शब्दकोशः निर्मातव्यः।
- प्रथमतः पञ्चमकक्षापर्यन्तं कक्षासु क्रमशः केचन विषयाः बालानां भाषायां पठितुं पाठयितुं च बलं दातव्यम्। एतदर्थं तेषाम् अवबोधस्य दृढतरम् आधारं प्रदातुं केषाञ्चन निजीविद्यालयैः सह संवादः अपि स्थापनीयः।
- विश्वविद्यालयैः सह मिलित्वा भाषा, सामाजिकविज्ञानम्, विज्ञानम् इत्यादीनां शिक्षणसम्बन्धिपाठ्यक्रमम् आरब्धुं विचारः करणीयः। अस्मिन् पाठ्यक्रमे स्वभाषायां विषयाणाम् अवबोधस्य महत्त्वे विशिष्टं बलं दातव्यम्।

**व्यवसायस्य समाह्वानानि-२**

दिल्लीनगरस्य उत्तरपश्चिममण्डले एशियाप्रान्तस्य बृहत्तमस्य शाकहट्टस्य आजादपुरनगरस्य समक्षं मार्गस्य पारे एव एकं विशालं पुनर्वासीयनिवासस्थानं जहांगीरपुरी वर्तते। सम्राट् जहाङ्गीरस्य शासनकालस्य मनोभावः अत्र निवसतां प्रायः प्रत्येकं निवासिनः व्यवहारे प्रतिबिम्बितः भवति। वसतेः एकस्यान्ते शोषणे प्रवृत्तं 'भलस्वा'सरोवरम् अस्ति, अपरे पार्श्वे न एकमपितु बहूनि सरोवराणि सन्ति येषु अस्याः वसतेः जनाः प्राणं संचारयन्ति। अस्यां वसतौ प्रौद्योगिकीप्रशिक्षणसंस्था (आई.आई.टी. इति) अपि अस्ति, यत्र प्लम्बिङ्ग इति, स्पिनिंग इति, डाइंग इति, फिटर इति, प्रिंटिंग इत्यादिनां नैकानां व्यावसायिककौशलानां प्रशिक्षणं प्रदीयते। अस्याः वसतेः पक्षान्ते अवसत्- 'अयोध्या-वस्त्रम्' 'आई.आई.टी.' इत्यनयोः विचित्रः सम्बन्धः अस्ति।

अस्मिन् कार्यस्थले पटनिर्माणम् पटे मुद्रणकार्यञ्च अभवत्। एतेन कार्येण प्रशिक्षणसम्बद्धाः पाठ्यक्रमाः 'आई.आई.टी.' इत्यत्र आसीत्। आश्चर्यं यत् इतः प्रशिक्षितानां नवानां यूनां कृते अस्मिन् कार्यस्थले कार्यं न दीयते स्म तथा चाप्रशिक्षितान् जनान् नियोज्यते स्म। सर्वेषां मनसि एषः एव विचारः प्लवति स्म यत् कदाचित् प्रशिक्षितानां श्रमिकाणां कृते अधिकं मासिकं वेतनं दातव्यं भविष्यति, एतदर्थं प्रशिक्षितान् श्रमिकान् कार्येषु न नियोजयन्ति। किन्तु प्रशिक्षणसंस्थायाः प्राध्यापकैः प्रशिक्षुभिश्च सह यदा मिलकर्मचारिणः संवादं कृतवन्तः तदा विषयः स्पष्टः

अभवत्। संस्थाने सम्पूर्णप्रक्रियायाः ज्ञानम् आंग्लभाषायां मानकहिन्दीभाषायाञ्च प्रदीयते। कार्यस्थलस्य वृद्धाः कार्यकर्तारः देशीयशब्दावलीनां प्रयोगं कुर्वन्ति स्म। यां शब्दावलीं संस्थानतः प्रशिक्षणं प्राप्तकर्तारः युवानः नावगच्छन्ति स्म। अन्ततः श्रमिकाणां देशजप्राविधिक-शब्दकोशः पाठ्यक्रमे योजितः। न केवलं एकस्मिन् पाठ्यक्रमे, अपितु एते प्रयत्नाः अधिकेषु पाठ्यक्रमेषु कृताः, तेन जनानां कृते स्थानीयकार्यस्थलेषु कार्यं प्राप्तुं सम्प्रति काठिन्यं नास्ति।

*– एकः प्रतिभागी*

# परिशिष्टम् – १

## राज्येषु विभिन्नस्तरेषु माध्यमभाषाः

| क्रमः | राज्यानि | प्राथमिकस्तरम् | माध्यमिकस्तरम् | उच्चतरमाध्यमिकस्तरम् |
|---|---|---|---|---|
| १ | आन्ध्रप्रदेशः | तेलुगु, उर्दू, उड़िया, अंग्रेज़ी, हिंदी, मराठी, कन्नड़, तमिल | तेलुगु, उर्दू, उड़िया, अंग्रेज़ी, हिंदी, मराठी, कन्नड़, तमिल | तेलुगु, उर्दू, उड़िया, अंग्रेज़ी, हिंदी, मराठी, कन्नड़, तमिल |
| २ | अरुणाचल प्रदेश: | हिंदी, अंग्रेज़ी | अंग्रेज़ी | अंग्रेज़ी |
| ३ | असम | असमिया, बांग्ला, बोडो, अंग्रेज़ी | असमिया, बांग्ला, बोडो, अंग्रेज़ी, अन्य | असमिया, बांग्ला, बोडो, अंग्रेज़ी, हिंदी, अन्य |
| ४ | बिहार | हिंदी, उर्दू, संस्कृत, अंग्रेज़ी | अंग्रेज़ी, हिंदी, संस्कृत, उर्दू | अंग्रेज़ी, हिंदी, संस्कृत, उर्दू, अन्य |
| ५ | छतीसगढ़ | हिंदी, अन्य | हिंदी, अन्य | अंग्रेज़ी, अन्य |
| ६ | गुजरात | गुजराती | अंग्रेज़ी, गुजराती, हिंदी | अंग्रेज़ी, गुजराती, हिंदी |
| ७ | गोवा | अंग्रेज़ी, कोंकणी, मराठी, उर्दू, कन्नड़ | अंग्रेज़ी, मराठी | अंग्रेज़ी, मराठी |
| ८ | हिमाचल प्रदेश | अंग्रेज़ी, हिंदी | अंग्रेज़ी, हिंदी | अंग्रेज़ी, हिंदी |
| ९ | हरियाणा | अंग्रेज़ी, हिंदी | अंग्रेज़ी, हिंदी | अंग्रेज़ी, हिंदी, संस्कृत |
| १० | जम्मू और कश्मीर | डोगरी, अंग्रेज़ी, हिंदी, कश्मीरी, उर्दू | डोगरी, अंग्रेज़ी, हिंदी, कश्मीरी, उर्दू | डोगरी, अंग्रेज़ी, हिंदी, कश्मीरी, उर्दू |
| ११ | झारखंड | अंग्रेज़ी, हिंदी, संस्कृत | बांग्ला, अंग्रेज़ी, हिंदी, संस्कृत | बांग्ला, अंग्रेज़ी, हिंदी, संस्कृत |
| १२ | कर्नाटक | कन्नड़, अंग्रेज़ी, हिंदी, मराठी, तमिल, तेलुगु, उर्दू, मलयालम, संस्कृत, अरबी | कन्नड़, अंग्रेज़ी, हिंदी, मराठी, तमिल, तेलुगु, उर्दू, मलयालम, संस्कृत, अरबी | कन्नड़, अंग्रेज़ी, हिंदी, मराठी, तमिल, तेलुगु, उर्दू, मलयालम, संस्कृत, अरबी |
| १३ | केरल | मलयालम, अंग्रेज़ी, तमिल, कन्नड़ | मलयालम, अंग्रेज़ी, तमिल, कन्नड़ | मलयालम, अंग्रेज़ी, तमिल, कन्नड़ |
| १४ | मध्य प्रदेश | अंग्रेज़ी, हिंदी, उर्दू, मराठी | अंग्रेज़ी, हिंदी, उर्दू, मराठी | अंग्रेज़ी, हिंदी, उर्दू, मराठी |

| | | | | |
|---|---|---|---|---|
| १५ | महाराष्ट्र | मराठी, हिंदी | अंग्रेज़ी, मराठी, हिंदी | अंग्रेज़ी, मराठी, हिंदी |
| १६ | मणिपुर | अंग्रेज़ी, हिंदी, मणिपुर | अंग्रेज़ी, हिंदी, मणिपुर | अंग्रेज़ी, हिंदी, मणिपुर |
| १७ | मेघालय | अंग्रेज़ी, गारो, खासी | अंग्रेज़ी | अंग्रेज़ी |
| १८ | मिजोरम | मिजो, अंग्रेज़ी | मिजो, अंग्रेज़ी | मिजो, अंग्रेज़ी |
| १९ | नागालैण्ड | अंगामी, आवो, अंग्रेज़ी. हिंदी, कोन्यक, लोथा, सेमा | अंगामी आवो, अंग्रेज़ी हिंदी, कोन्यक, सेमा | अंगामी, अंग्रेज़ी हिंदी |
| २० | उड़ीसा | अंग्रेज़ी, उड़िया | अंग्रेज़ी, उड़िया | |
| २१ | पंजाब | अंग्रेज़ी, हिंदी, पंजाबी | अंग्रेज़ी, हिंदी, पंजाबी | अंग्रेज़ी, हिंदी, पंजाबी |
| २२ | राजस्थान | हिंदी | हिंदी | हिंदी |
| २३ | सिक्किम | सिक्किम | सिक्किम | सिक्किम |
| २४ | त्रिपुरा | बांग्ला, कोकबो-रोक, अंग्रेज़ी | बांग्ला, अंग्रेज़ी | बांग्ला, अंग्रेज़ी |
| २५ | तमिलनाडु | अंग्रेज़ी, तमिल | तमिल, तेलुगु, मल-यालम, उर्दू, कन्नड़ अंग्रेज़ी, हिंदी, उर्दू | तमिल, तेलुगु, मलया-लम, उर्दू, कन्नड़ |
| २६ | उत्तराखंड | हिंदी | अंग्रेज़ी, हिंदी, उर्दू | अंग्रेज़ी, हिंदी, उर्दू |
| २७ | उत्तर प्रदेश | हिंदी | अंग्रेज़ी, हिंदी, संस्कृत | अंग्रेज़ी, हिंदी, संस्कृत |
| २८ | पश्चिम बंगाल | बांग्ला | बांग्ला, हिंदी, अंग्रेज़ी, उर्दू, उड़िया, तमिल, तेलुगु, गुजराती, तिब्बतन, नेपाली | बांग्ला, हिंदी, अंग्रेज़ी, उर्दू, उड़िया, तमिल, तेलुगु, गुजराती, तिब्ब-तन, नेपाली |
| २९ | अंडमान और -निकोबार | बांग्ला, अंग्रेज़ी, हिंदी, तमिल तेलुगु | बांग्ला, अंग्रेज़ी, हिंदी.. तमिल तेलुगु | बांग्ला, अंग्रेज़ी, हिंदी, तमिल, तेलुगु |
| ३० | चंडीगढ़ | अंग्रेज़ी, हिंदी, पंजाबी | अंग्रेज़ी, हिंदी, पंजाबी | हिंदी पंजाबी |
| ३१ | दादर और नगर हवेली | अंग्रेज़ी गुजराती हिंदी मराठी | अंग्रेज़ी गुजराती हिंद मराठी संस्कृत | अंग्रेज़ी, गुजराती, हिंदी, मराठी संस्कृत |

| | | | | |
|---|---|---|---|---|
| ३२ | दमन और द्वीव गुजराती, अंग्रेज़ी | गुजराती, अंग्रेज़ी | गुजराती, अंग्रेज़ी | गुजराती, अंग्रेज़ी |
| ३३ | दिल्ली | अंग्रेज़ी, हिंदी, उर्दू, | अंग्रेज़ी, हिंदी, उर्दू, | अंग्रेज़ी, हिंदी, उर्दू, |
| ३४ | लक्षद्वीप | मलयालम | अंग्रेज़ी, मलयालम | अंग्रेज़ी, मलयालम |
| ३५ | पुदुच्चेरी | अंग्रेज़ी, तमिल | अंग्रेज़ी, तमिल | अंग्रेज़ी, तमिल |

*स्रोतः*- इंप्लीमेंटेशन ऑफ थ्री लैंग्वेज फॉर्मूला इन इंडियन स्कूल्स-ए स्टडी, भाषा विभाग, एन.सी. ई.आर.टी., नवदेहली, २००९, पृष्ठम्- ८०-८३

प्रसन्नतायाः विषयो वर्तते यद् वर्तमानसमये वनवासिक्षेत्रीयाः वहव्यः भाषाः माध्यमभाषारूपेण प्रयुज्यमानाः भवन्ति। एतासु भाषासु प्राथमिकस्तरीयशिक्षणसामग्रीः अपि निर्मीयन्ते। भाव्यमानसमये इतोऽप्यधिकाः भारतीयभाषाः (क्षेत्रीयवनवासिभाषाभिः साकम्) माध्यमभाषारूपेण प्रयुक्ताः भवन्तु। अस्याः पुस्तिकायाः इदमेव उद्देश्यं वर्तते।

## सन्दर्भाः


- शिक्षायोगस्य प्रतिवेदनम्, १९६४-६६, शिक्षामंत्रालयः, १९६६.
- राष्ट्रियशिक्षानीतिः १९६८, शिक्षामंत्रालयः
- क्रियान्वयनस्य कार्यक्रमः ९९२ (राष्ट्रियशिक्षानीतिः १९८६), शिक्षाविभागः, शिक्षामंत्रालयः.
- राष्ट्रियपाठ्यचर्यायाः रूपरेखा विद्यालयीयशिक्षा २०००. एन.सी.ई.आर.टी,
- राष्ट्रियपाठ्यचर्यायाः रूपरेखा २००५. एन.सी.ई.आर.टी,
- भारतीय भाषाओं का शिक्षा आधार पत्र 1.3. 2006, एन.सी.ई.आर.टी पटनायक, डी.पी. 1986 स्टडी ऑफ लैंग्वेज रिपोर्ट नवदिल्ली एन.सी.ई. आर.टी,
- भारतीय भाषाओं का शिक्षण, आधारपत्रम् 1.3. 2006, एन.सी.ई.आर.टी.,
- गांधी. एम.के. हिंद स्वराज भारतीय मत, १९०९
- बच्चों के मुफ्त और अनिवार्य शिक्षा का अधिकार अधिनियम 2009 कानून और न्याय मंत्रालय (विधान विभाग), भारत सरकार चॉम्स्की, एन. 1959 रीव्यू ऑफ स्कीनर्स वर्बल बिहेवियर लैग्वेज 35.1: 26-58
- व्योगोत्स्की, एल.एस. 1978 माइंड इन सोसाइटी द डेवेलपमेंट ऑफ हायर साइकोलॉजिकल
- प्रॉसेस कैंब्रिज, मास: हार्वर्ड यूनिवर्सिटी प्रेस,
- कूपर, के. (2009), लैंग्वेज आवर मीडियम ऑफ अंडरस्टैंडिंग जर्नल ऑफ इण्डियन एजुकेशन, वॉल्यूम XXXV, नंबर 1 नई दिल्ली: एन.सी.ई.आर.टी (ISSN: 0972-5628)
- कपूर, के. ईएलटी एंड सोशल जस्टिस इन मल्टीलिंगुअल क्लासरूम. बेबीलोनाया, टेमा 12021 P.24.
- भारतीय भाषाओं का शिक्षण, आधार पत्र 1.3, 2006, एन.सी.ई.आर.टी,
- होल्ट, जॉन. शिक्षा की बजाय. न्यू: बैलेंटाइन बुक्स, 1974.
- अंग्रेजी शिक्षण, आधार पत्र 1.4, 2006, एन.सी.ई.आर.टी. प्रभु. एन. एस. 1987 सेकेंड लैंग्वेज पेडागॉजी. ऑक्सफोर्ड: न्यू यॉर्क: ऑक्सफोर्ड यूनिवर्सिटी प्रेस.

- डोवेरा, एस. 2005. इलेक्टिसिज्म इन मेथोडोलॉजी. एमएस. एनएफजी, इंग्लिश.
- फेलिक्स, पॉल. 1998. लर्निंग टू रीड इंग्लिश: द मिक्सड कोड वे, इन विवियन बेरी " टू एण्ड ऑर्थर एमसी नेल (सम्पा.) पॉलिसी एण्ड प्रक्टिस इन लैंग्वेज एजुकेशन, हांग कांगः डिपार्टमेंट ऑफ करिकुलम स्टडीज, यूनिवर्सिटी ऑफ हांग कांग. पृष्ठ 175-193

# टिप्पणी

# टिप्पणी

सर्वाः शिक्षाः छात्राणां क्षेत्रीयभाषया (मातृभाषया) दातव्याः।

*– नवशिक्षा, महात्मागाँधी*

शिक्षायां मातृभाषा बालानां कृते मातृदुग्धसमं भवति। यावत् मातृभाषा शिक्षामाध्यमं न करिष्यते तावत् शिक्षायाः सार्वभौमिकीकरणं न सम्भवति।

*– रवीन्द्रनाथः टैगोरः*

---

अधिकं विवरणार्थं कृपया www.ncert.nic.in इति सञ्चिकां पश्यन्तु अथवा प्रतिलिप्यधिकारपृष्ठे प्रदत्ते पत्राचारे व्यापारप्रबन्धकेन सम्पर्कं कुर्वन्तु।

32156

विद्ययाऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

ISBN 978-93-5292-884-2